M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 829

Title: Vedanta Sar Tika

829

वेदान्तसार टीका

Title	:	Vedānta Sāra Tikā
Author	:	Nrisimha Sāraswati
Editor	:	
Year. Vols.	:	
Publisher	:	
Remarks	:	829

श्रीगणेशांबिकाभ्यां नमः ॥ ॥ श्रीसरस्वत्यै नमः ॥ ॥ रामानंदगुरुं नत्वा परमानंदमद्वयं ॥ वक्ष्ये वेदांतसारस्य
टीकां नाम्ना सुबोधिनीं ॥ इह खलु कश्चित्सदा पुरुषार्थानित्याध्ययनविधिना ॥ सकलवेदशास्त्रानोचित्वा
त्याश्रयतद्रूपाद्वयानंदविषयानंदविषयानाद्यनिर्वचनीयभावरूपात्तार्नविलसिता ॥ नैतत्सर्वानुष्ठित
काम्यनिषिद्धवर्जितनित्यनैमित्तिककर्मायश्चित्तोपासनाकर्मभिः सम्यक्प्रसन्नेश्वराणामिष्टिकाचूर्णादि
घर्षिताः ॥ दर्पणवदतिनिर्मलाशयानां नालनीदलगतबिंदुवत्तहिरण्यगर्भादिस्तंबपर्यंतजीवजात
स्यात्मवत्समत्वेनास्मात्तगत्तं क्षणभंगुरं तापत्रयाग्निसंदीपितं स्मात्मनमनित्यमात्मन्यतु पद्रूपतामतिविवि
किनामतानावर्गहितस्य सकलचंदनादिविषयभोगस्यः आमुष्मिकहिरण्यगर्भादसत्तमांगस्यश्ववांता
शानद्वयः अतिनिर्विण्णमानसानांशमादिसाधनसंपन्नानामायातनोऽधिता अखिलवेदार्थत्वात् ॥
देहाद्यहंकारपर्यंतजडपदार्थतद्विलक्षणस्वप्रकाशस्वरूपप्रत्यगात्मनि ब्रह्मानंदत्वेन ज्ञायाप
न्नानांतत्त्वजिज्ञासूनामस्य श्रवणेन मूलाज्ञाननिवृत्तिपरमानंदावाप्तिसिद्धये प्रकारणमारभ्य
णं तत्समाप्तिः ॥ प्रचयगमनादिफलकशिष्टाचारपरिप्राप्तं इष्टदेवतानमस्कारलक्षणमंगला
चारणमस्य अवश्यकर्तव्यतां प्रदर्शयन्नलक्षणयाऽनुबंधचतुष्टयं निरूपयन् परमात्मानं नमस्कुरुते ॥ राम० १

अखंडमित्यादिना ॥ अभिष्टस्य निश्रेयसस्य सिद्धये प्राप्त्यर्थं आत्मानं आश्रये एकत्वेन प्रतिपाद्यत इत्यर्थः
नन्वविषयस्यात्मनः कथं प्रतिपत्तिरित्याशंक्याह ॥ अखिलाधारमिति अखिलस्य चराचरात्मकप्रपंच
स्य विवर्ताधिष्ठानत्वेन कारणात्कांतब्रह्मैव प्रतिपद्येन तृष्णामित्यर्थः ॥ नन्वेवं च सति प्रतिविषयत्वेन द्व
रूपत्वापत्तिमाशंक्याह ॥ अवाङ्मनसगोचरमिति ॥ यतो वाचो निवर्तंते इत्यादिश्रुतिनिरविषयत्वप्रति
पादनात् ॥ प्रतिपत्तिविषयत्वं कारणत्वोपलक्षितब्रह्मविषयत्वेनोपचारिकमिति भावः ॥ नन्वेवमपि

अखंडं सच्चिदानंदमवाङ्मनसगोचरं ॥ आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ १ ॥

कारणत्वेमतपिंडवदनित्यत्वशंकामपहरन्नाह ॥ सदिति सत्प्रकाशैवेतत्स्वरूपमिति यावत् ॥ ननु
तथाप्यपुरुषार्थत्वात्किमित्याश्रयणीयमित्यत आह ॥ आनंदमिति ॥ परमानंदरूपमित्यर्थः ॥ न
नुलक्षितेऽपि लक्षणेन शांतोऽध्याधिरितिन्यायेन प्रपंचस्याधिष्ठानव्यतिरिक्ततयाऽप्रतियमानत्वात्
रूपमद्वैतसिद्धिरित्याशंक्यांतत्कुर्वन्नाह ॥ अखंडमिति ॥ सजातीयविजातीयस्वगतभेदशून्य
मित्यर्थः ॥ अत्र सच्चिदानंदमितिप्रयोजनं अखंडमिति विषयः शास्त्रविषयोः प्रतिपाद्यप्रतिपादकभा

वे०टी०
२

तस्मान्मोधिकारित्यनुबंधचतुष्टयमर्थादुक्तं भवति॥१॥ किंच यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः इत्यादिश्रुत्या गुरुनमस्कारस्यापि शास्त्रांगत्वप्रतिपाद
नात्तन्नमस्कारोपि पृथक्केन न कार्य इति तेन तिपूर्वकमभिधेयं ग्रंथं प्रतिजानीते॥ अर्थत इति॥ अ
पिडितस्याप्यादिकसंज्ञामात्रं व्यवच्छिद्यते॥ न केवलं शब्दतः अर्थतः शब्दतश्चेति॥ अखानंदान्
गुरून् आराध्य वेदांतसारं यथामति वक्ष्ये इत्यन्वयः॥ तान् गुरून् आराध्य कायवाचमनोभिर्नम

अर्थतोप्यद्वयानंदानतीतद्वैतभानतः॥ गुरूनाराध्य वेदांत
सारं वक्ष्ये यथामति॥२॥ वेदांतो नाम उपनिषत्प्रमाणं॥

स्कारगोचरीकृत्य वेदांतसारं वेदांतानामुपनिषद्वाक्यजातानां मध्ये यत्सारं सिद्धांतरहस्यं यस्मि
न् ज्ञाते पुनर्ज्ञातव्यं न अवशिष्यते॥ तं वेदांतसारं यथामति बुद्धिमनतिक्रम्य वक्ष्ये प्रतिपादयिष्या
मीत्यर्थः॥२॥ इदानीं सर्वस्यापि वस्तुविचारो देशपूर्वकत्वात्प्रतिज्ञातवेदांतनामतो निर्दिश राम
ति॥ वेदांत इति॥ उपनिषद एव प्रमाणं उपनिषत्प्रमाणं॥ उपनिषदो यत्र प्रमाणमिति वा॥ ॥ २

तत् उपकारीणि वेदांतवाक्यसंग्रहकाणि शारीरकसूत्रादिनि॥ अथातो ब्रह्मजिज्ञासा इत्यादीनि
सूत्रादीनि। आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यंते तेषामपि उपनिषद्वाक्यत्वादिति भावः॥
ननु प्रथमपि श्रोतारानुबंधचतुष्टयमप्रदर्श्य ग्रंथे तेन निर्दिष्टं॥ तथापि परमानुबंधचतुष्टयस्यानिरूपितत्वादत्र
प्रेक्षावतां प्रवृत्तिसिद्ध्यर्थं तदाविः करोति॥ अनुबंधेति शास्त्रस्य मूलशास्त्रस्यानुबंधचतु + चतुष्टयमे

तदुपकारीणि शारीरकसूत्रादीनि च॥ अस्य वेदांतप्रकरणत्वात् तदीयैरेवानुबंधैस्तद्वत्तासिद्धे
र्न ते पृथगालोचनीयाः॥ तत्रानुबंधो नाम अधिकारिविषयसंबंधप्रयोजनानि॥ अधिका
री तु विधिवत् अधीतवेदवेदांगत्वेनापाततोधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मांतरे वा॥

वाह॥ अधिकारिलक्षणं दर्शयति॥ स्वाध्यायोध्येतव्य इति वचनात्त्रैवर्णिकानामुपवीतानाम
ध्ययनेन नियमेन विधीयते॥ अध्ययनविधिप्रयुक्तमेवाध्ययनं नामाध्ययनविधिप्रयुक्तं॥ त
था च अधीतो वेदो वेदांगानि च शिक्षा कल्प व्याकरण छंदो ज्योतिर्निरुक्ताख्यानि॥ यत् तत्सौयैना
पाततोधिगताखिलवेदार्थः॥ अत्र सर्ववेदार्थरहस्ये ज्ञाते सति उत्तरग्रंथे पर्वे यथार्थपरिहाराय अपपा
तइत्युक्तं भवति॥ ॥

वे० टी०
२

नन्वनधीतवेदानामपि विदुरादीनां तत्त्वज्ञानोत्पत्तिदर्शनादध्ययनतत्प्रयुक्तकर्मानुष्ठानवैयर्थ्यमाशंक्या
ऽस्मिन्नरमाह जन्मांतर इति।। तेषामाधुनीकाध्ययनाभावेपि जन्मांतरीयाध्ययनादिना चित्तपरिपाकवत्तोऽस्मि
न्जन्मनि विनाप्यध्ययनादिना ज्ञानोत्पत्तौ बाधकाभावात्राध्ययनादिनां वैयर्थ्यमिति भावः।। काम्येति का
म्यस्यापि कर्मणः धर्मसाधनत्वेपि यातायातसंपादकत्वेन बंधः स्यात् त्रिशंकुवत्।। तद्वर्जनपुरःसरमि
काम्यनिषिद्धवर्जनःपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गताखिलकल्मषत
यानितांतनिर्मलस्वांतः साधनचतुष्टयसंपन्नः प्रमाता।। काम्यानि स्वर्गादीष्टसाधनानि ज्यो
तिष्टोमादीनि।। निषिद्धानि नरकाद्यनिष्टसाधनानि ब्रह्महननादीनि।। नित्यान्यकरणे प्रत्यवा
यसाधनानि संध्यावंदनादीनि।।।। त्युक्तं। तथा च नित्यादिकर्मानुष्ठानेन निर्गता निखिलकल्मष
तया नितांतनिःशेषनिरस्तसकलकल्मषत्वेन। अत्र निखिलपदं काम्यनिषिद्धजनितसुकृतदु
ष्कृतपरं नितांतनिर्मलस्वांतः नितांतमत्यंतं निर्मलं स्वच्छं स्वांतमंतःकरणं यस्य सः तथोक्तः।।
वक्ष्यमाणसाधनचतुष्टयसंपन्नः प्रमाता।। अंतःकरणप्रतिबिंबितचैतन्यमित्यर्थः। एतदेव स्पष्टय

राम
२

तमेव विविदिषंति वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेनेति श्रुतिः।। यथातितृयां बुभुक्षया भोजनादन्य
नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि।। प्रायश्चित्तानि पापक्षयसाधनानि कृच्छ्रचांद्राय
णादीनि। उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शांडिल्यविद्यादीनि।। एतेषां नित्या
दीनां बुद्धिशुद्धिः परं प्रयोजनं।। उपासनानां तु चित्तैकाग्र्यं। विविदिषंति यज्ञेनेत्यादिश्रुतेः।। त
पसा कल्मषं हंतीत्यादिस्मृतेश्च नित्यनैमित्तिकप्रायश्चित्तोपासनानां अवांतरफलं पितृलोकस
त्यलोकप्राप्तिः कर्मणा पितृलोकः विद्यया देवलोक इत्यादिश्रुतेः।। साधनानि नित्यानित्यवस्तुविवेके
हामुत्रार्थफलभोगविरागशमदमादिषट्कसंपत्तिमुमुक्षुत्वानि।। नित्यानित्यवस्तुविवेकस्ताव
न्ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनं।। ऐहिकानां स्रक्चंदनादिविषयभो
गानां कर्मजन्यतया अनित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो
ऽतितरां विरक्तिरिहामुत्रार्थफलभोगविरागः।। ।। व्यापारो मनसो न रोचते भोजने विलंबं न स
हते।। तथा स्रक्चंदनादिविषयेष्वत्यंतमरुचिः। तत्त्वज्ञानसाधनेषु।।

वे०टी०
४

श्रवणमननादिष्वत्यंतमभिरुचिर्जायते॥ तदा पूर्ववासनाबलात्॥ श्रवणादिसाधनेभ्यः उद्धीय
स्रक्चंदनादिविषयेषु गम्या॥ मानं मनो येनांतःकरणवृत्तिविशेषेण निवर्त्तते स तु शम इत्यर्थः॥
इदानीं दमस्य लक्षणमाह॥ तत्त्वज्ञानसाधनश्रवणादिसाधनेभ्यो विलक्षणेषु शब्दादिविषयेषु
प्रवर्त्तमानानि बाह्येंद्रियाणि येन वृत्तिविशेषेण निवर्त्तंते स दम इत्यर्थः॥ इदानीं उपरतेर्लक्ष

शमादयः॥ शमदमोपरमतितिक्षासमाधानश्रद्धाः॥ शमस्तावच्छ्रवणादिव्यतिरिक्तविषये
भ्यो मनसो निग्रहः॥ दमो बाह्येंद्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्त्तनं निवर्त्तितानां तेषां त
द्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः॥ अथवा विहितानां कर्मणां विधिना परित्यागः॥

णमाह॥ निगृहीतानामेव तेषां बाह्येंद्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा ता
नींद्रियाणि सर्वथा न गच्छंति तेषां निग्रहो येन वृत्तिविशेषेण क्रियते सोपरतिरित्यर्थः॥ उपरते
लक्षणांतरमाह॥ विहितानां नित्यादिकर्मणां विधिना चतुर्थाश्रमस्वीकारेण कर्मणां परित्यागः
नाहकर्त्तव्यवस्थानेमुपरतिरित्यर्थः॥

राम
४

तितिक्षायाल लक्षणमाह॥ शरीरधर्मस्य शीतोष्णादेरसंतापावादिति॥ उपकारेषु अमानित्वा
दिसाधनविषयेषु समाधिनैरंतर्येण सच्चिंतनं समाधानमित्यर्थः॥ श्रद्धादयः स्पष्टार्थाः॥ तथाच
पूर्वोक्तसकलविशेषणविशिष्टः प्रमाताधिकारीत्यर्थः॥ अस्मिन्नर्थे श्रुतिं प्रमाणयति॥ स्पष्टार्थः

तितिक्षा शीतोष्णादिद्वंद्वसहिष्णुता॥ निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः
समाधानं॥ गुरुवेदांतवाक्येषु विश्वासः श्रद्धा॥ मुमुक्षुत्वं मोक्षेच्छात्वं॥ एवंभूतः प्रमाताधि
कारी॥ शांतो दांत इति श्रुतेः॥ प्रशांतचित्ताय जितेंद्रियाय प्रहीणदोषाय यथोक्तकारिणे॥ गु
तं
णान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे इति॥ विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं
प्रमेयमिति यावत्॥ तत्रैव सर्ववेदांतानां तात्पर्यात्॥ संबंधस्तदैक्यप्रमेयस्य तत्प्रतिपादकोप
बोधन.
निषत्प्रमाणस्य च बोधकभावलक्षणः॥ यथोद्देशं विषयं निरूपयति॥ विषय इति॥ अविद्याध्या
रोपित सर्वज्ञत्वकिंचिज्ज्ञत्वादिविरुद्धधर्मपरित्यागेनावशिष्टं शुद्धचैतन्यं तदेव स्वरूपमेव स
र्वेषां वेदांतवाक्यानां विषय इत्यर्थः॥ क्रमप्राप्तं संबंधं लक्षयति॥ संबंध इति॥ स एव संबंधः

रामः॥

मे०टी० ५

स्वविशिष्टप्रयोजनमाह। ब्रह्मात्मैकत्वलक्षणविषयगतज्ञानतत्कार्यसकलप्रपंचनिवृत्तिः॥ पुनरु
त्पत्त्यभावरूपः स्वस्वरूपाखंडानंदप्राप्तिफलमित्यर्थः॥ ननु लोके प्रसिद्धक्रियासाध्यस्वर्गादिः पु
रुषार्थत्वेन फलं दृष्टं॥ अत्र पुरुषार्थत्वात्फलं दृष्टं। एवमत्रापि नित्यप्राप्तस्यात्मनमोहांधकारनि
वृत्तौ सत्यां स्वयंप्रकाशमानचिद्रूपस्य सिद्धस्यैवात्मनः फलमुपचर्यत इति भावः॥ उक्तं ग्रंथकृतिं प्र
माणयति॥ अधुना शास्त्रारंभनिमित्ताधिकार्यादिनिरूपणानंतरं शास्त्रारंभं प्रस्तौति॥ अथबाला
प्रयोजनं त्वत्र देवप्रमेयगतज्ञाननिवृत्तिस्वस्वरूपानंदावाप्तिश्च। तरति शोकमात्मविदित्यादिश्रु
तेर्ब्रह्मविद्ब्रह्मैव भवतीत्यादिश्रुतेश्च॥ अयमधिकारी जन्ममरणादिसंसारानलसंतप्तः प्रदीप्तशि
राजलराशिमिवोपहारपाणिः॥ क्षितस्याधिकारिणः वृत्तं संदर्शयति॥ अयमिति। उक्तलक्षणलक्षि
तो बुद्धिस्थत्रिविधितोऽधिकारी गुरुमुपसरतीत्यर्थः॥ ननु संसारासक्तस्य विलपलोलुपस्यान्निरहितस्य
गुरोरुपसर्पणे मयुक्तमित्याशंक्याह॥ संसारानलसंतप्त इति॥ संतापे हेतुमाह॥ जन्ममरणेतिआ
दिशब्देन व्याध्यादयो गृह्यंते। अदग्धमस्तको दाहनिवृत्तिकामो यथा शीतलं जलराशिं अनुसरति।

तथा दह्यमानस्तन्निवृत्तिकामः स्वस्वरूपजिज्ञासुः संसारनिवर्तकं॥ श्रोत्रियं ब्रह्मनिष्ठं करतलामलकवस्त्व
प्रकाशस्वरूपात्मकं गुरुं समीपं गत्वा अनुसरति॥ मनोवाक्कायकर्मभिः सेवत इत्यर्थः॥ अस्मिन्नर्थे
श्रुतिमुदाहरति॥ समित्पाणिरिति स्पष्टार्थः॥ अथ गुरुकृत्यमाह॥ स इति॥ अत्र स पूर्वोक्तो गुरुरेनं शि
ष्यमुपदिशतीत्यन्वयः॥ स परमरहस्यमपि ब्रह्मरूपं कस्मादुपदिशतीत्यत आह॥ कृपयाव्यतिरेके
श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति॥ समित्पाणिः श्रोत्रियमित्यादिश्रुतेः॥ स परमकृ
पयाध्यारोपापवादन्यायेनैनमुपदिशति॥ तस्मै स विद्वानुपसन्नाय आत्मतत्त्वं प्राहेत्यादिश्रुतेः॥
णसाधनांतराभावादित्यर्थः॥ नन्वखंडब्रह्मस्वरूपस्यागोचरत्वेन उपदेष्टुमशक्यत्वात्क
थमुपदिशतीत्यनुसरत आह॥ अध्यारोपेति अखंडब्रह्मस्वरूपस्याविधिमुखत्वेपि नेहनानास्ति
किंचनेत्यादिश्रुतिमनुसृत्य अखिलाध्यारोपितमिथ्यानानापदार्थनिषेधमुखेनोपलक्षितं॥ अखंडं चे
तन्यमेव पुनः सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिमनुसृत्य लक्षणयाविधिमुखेनाप्युपदिशति
भावः॥ तत्र श्रुतिमाह॥ तस्मिन्नर्थे सेष स्पृष्टं॥

वेदांतसारटी॰ राम ५

वे० टी० ६

तस्मिन्नर्थे लौकिकं दृष्टांतमाह ॥ असर्पभूत इति ॥ व्यावहारिके वस्तुत्वेनाभिमते रज्जौ अवस्तुभूतस
र्पारोपवत् वस्तुनि अवस्त्वारोपो ध्यारोपः ॥ व्यावहारिके वस्तुत्वेनाभिमते रज्जौ अवस्तुभूतस
र्पारोपो नाम रज्ज्ववच्छिन्नचैतन्यस्थाविद्या स्वयं ज्ञानाज्ञासंस्कारेण ममापि सर्पाकारेण विवर्त्त
ते ॥ स विवर्त्तो रज्ज्ववच्छिन्नचैतन्यनिष्ठाविद्योपादानत्वेन नायं सर्पः ॥ किंतु रज्जुरिति विशेषद
र्शिनो नरस्य कालिनाधिष्ठानरज्जुसाक्षात्कारेण रज्ज्वज्ञाननिवृत्तौ संपन्नभ्रांतिनिवर्त्तत इत्यर्थः ॥ उ
क्तसर्पभूतरज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपो ध्यारोपः ॥ वस्तु सच्चिदानंदाद्वयं ब्रह्म ॥ अ
ज्ञानादिसकलजडसमूहो अवस्तु ॥ अज्ञानं तु सदसद्भ्यामनिर्वचनीयं ॥ इममर्थं दृष्टांतके योज
यति ॥ वस्त्विति ॥ कालत्रयानपायि आत्मैव वस्तुशब्दार्थः ॥ तत्रावस्तुस्वरूपमाह ॥ अज्ञानादीति
अज्ञानतत्कार्ययोर्मादेर्मिथ्यात्वात् दृश्यत्वात् सावयवत्वाद्विकारित्वात् सापेक्षसिद्धिकत्वादिहे
तुभिरवस्तुवदित्यर्थः ॥ एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्वरूपं तावदाह ॥ अज्ञानमिति किमि
दं अज्ञानं सद्रूपमसद्रूपं वा नाद्यः ॥ तस्य शशविषाणतुल्यत्वेन तुच्छत्वात् नापि द्वितीयः ॥ असतः का
रणत्वानुपपत्तेरित्यादिहेतुभिः ॥ ॥ रामु० ६

सत्वेनासत्वेन वा निरूपयितुमशक्यमित्याह ॥ अनिर्वचनीयमिति ॥ नन्वज्ञानस्यानिर्वचनीयत्वे
सर्वथाज्ञातुमशक्यत्वात्तदभावप्रसंगमाशंक्याह ॥ त्रिगुणात्मकमिति ॥ अजामेकामित्यादिश्रुतिभिः
सत्वरजस्तमोगुणात्मकत्वप्रतिपादनादित्यर्थः ॥ नन्वेवमजस्याज्ञानस्य श्रुतिप्रसिद्धस्य व्योमादिरू
पेणावितनस्य सम्यं वृक्षाससमानत्वेन संसारानिवृत्तिमाशंक्याह ॥ ज्ञानविरोधीति ॥ एतादृशमप्यज्ञा
नं आत्मसाक्षात्कारेण निवर्त्तत इत्यर्थः ॥ तदुक्तं भगवता दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥
त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किंचिदिति हि वदंति ॥ अहमज्ञ इत्याद्यनुभवात् ॥ देवा
त्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेश्च ॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ ज्ञानाभाव एवाज्ञान
मिति तार्किकमतं निराकरोति ॥ भावरूपमिति ॥ त्रिगुणात्मकभावरूपत्वेऽपि इदमित्थमेवेति पिं
डीकृत्य प्रदर्शयितुमशक्यमित्याह ॥ यत्किंचिदिति किमप्यघटितघटनापटीयसीत्यर्थः ॥ अनि
र्वचनादिभावरूपाज्ञानसद्भावेऽनुभवमेवोदाहृत्य दर्शयति ॥ अहमज्ञ इत्याद्यनुभवात् अहमज्ञो मा
महं न जानामीत्यपरोक्षावभास एव प्रमाणमित्यर्थः ॥ तस्यैवोपष्टंभकत्वेन श्रुतिमुदाहरति ॥ देवात्म
शक्तिमिति ॥ ॥

स्पष्टं॥ अज्ञानं विभजते इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकं अनेकं इति व्यवह्रियते॥ वस्तुतो ज्ञानस्यैकत्वे
पि समष्ट्यभिप्रायेणैकमिति व्यष्ट्यभिप्रायेणानेकमित्यर्थः॥ तदेव प्रपंचयितुं प्रतिजानीते॥ यथेति॥ य
था बहूनां वृक्षाणां समुदायविवक्षया वनमित्येकत्वव्यपदेशः॥ यथा वा बहूनां घादिजलानां समु
दायविवक्षया जलाशय इत्येकत्वव्यपदेशः॥ तथांतःकरणोपाधिभेदेन नानात्वेन प्रतीयमानानां जी

ष्ठ इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति व्यवह्रियते॥ तथाहि यथा वृक्षाणां समष्ट्य
भिप्रायेण वनमित्येकत्वव्यपदेशः॥ यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति॥ तथा ना
नात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः॥ अजामेकां लो
हितशुक्लकृष्णामित्यादिश्रुतेः॥ इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना॥ वगतानां स
मुदायविवक्षया ज्ञानमित्येकत्वव्यपदेश इत्यर्थः॥ अस्मिन्नर्थे श्रुतिं प्रमाणयति नानागतजीव
निकृष्टांतःकरणव्युपाध्यपासमष्ट्युपाधेरस्य वैलक्षण्यं दर्शयति॥ विगतरागादिदोषसकल
कार्यप्रपंचस्य जगत्कारणत्वं तस्य समष्टिकृतोपाधित्वेन शुद्धसत्त्वप्राधान्यमिति भावः॥

एतत्समष्ट्युपाधिद्वारेणेश्वरचैतन्यं लक्षयति॥ एतदिति॥ एतत्समष्ट्यज्ञानोपलक्षितं चैतन्यं सर्व
स्य चराचरात्मकप्रपंचस्य साक्षित्वेन सर्वज्ञ इत्युच्यते॥ सर्वेषां जीवानां कर्मानुरूपेपि तत्तं न फल
दानत्वेनेश्वर इत्युच्यते॥ तथा सर्वेषां जीवानामंतर्हृदयस्थित्वा बुद्धिनियामीत्युच्यते॥ सर्वस्य चरा
चरात्मकप्रपंचस्य विवर्त्ताधिष्ठानजगत्कारणत्वमिति व्यपदिश्यत इत्यर्थः॥ उक्तेर्थे युक्तिमाह॥
एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियंतृत्वादिगुणकं सदव्यक्तमंतर्यामी जगत्कार
णमीश्वर इति च व्यपदिश्यते॥ सकलाज्ञानावभासकत्वात्॥ यः सर्वज्ञः सर्वविदित्यादिश्रुते
श्च॥ अस्येयं समष्टिरखिलकारणत्वात्कारणशरीरमानंदप्रचुरत्वात्कोशवदाच्छादक
त्वाच्चानंदमयकोशः॥ सकलेति स्पष्टार्थः॥ अत्र प्रमाणमाह॥ य इति श्रुतेः स्पष्टः॥ इदानीं तस्ये
श्वरस्य समुदायोपाधिरेव कारणशरीरत्वमानंदमयकोशत्वं सुषुप्तिवस्थावैशिष्ट्यं च मत इत्या
ह॥ अस्येयमिति॥ कारणशरीरत्वे हेतुमाह॥ अखिलेति॥ आनंदत्वे हेतुमाह॥ आनंदप्रचुर
त्वादिति॥ कारणत्वावस्थायां प्रकृतिपुरुषमात्रव्यतिरिक्तस्य स्थूलकार्यप्रपंचस्याभावादानं
दबाहुल्यमिति कोशत्वे युक्तिमाह॥

वे०टी० ९

आछादकत्वादिति॥ शरीराछादकचर्मवदाछादकत्वादेतानस्य कोश इति व्यवहार इत्यर्थः॥ ननु तथापि का
रणत्वोपाधिरेवज्ञानस्य सुषुप्तित्वं कुत इत्यत आह॥ सर्वइति॥ सर्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ
लीनत्वात्सुषुप्तित्वमित्यर्थः॥ ननु स्थूलसूक्ष्मप्रपंचलयस्थानस्य कथं सुषुप्तित्वं इत्याशंक्य संज्ञाभेद
इत्याह॥ अतइति॥ यतः कारणत्वात्सुषुप्तित्वं अतएव पंचीकृतस्थूलप्रपंचस्य जाग्रदवस्थाविशि
ष्टस्य अपंचीकृतभूतकार्यस्य सूक्ष्मस्य प्रपंचस्य लयस्थानमित्यपि व्यवह्रियत इत्यर्थः॥ समष्टि

सर्वोपरमत्वात्सुषुप्तिः॥ अतएव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते॥ यथावनस्य व्य
ष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः॥ यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति॥ त
थाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः॥ रूपाज्ञानं सप्रपंचं निरूप्येदानीं व्यष्टिरू
पमज्ञानं निरूपयितुं दृष्टांतौ तावद्दर्शयति॥ यथा वनस्य व्यपदेशः॥ यथा बहुवृक्षसमुदायस्य
वनत्वेन रूपेणैकत्वव्यवहारे प्रत्येकवृक्षविवक्षया चूतादयो बहवः॥ वृक्षाः सन्तीति बहुव्य
वहारः॥ यथा वापीकूपतडागादिषु समुदायविवक्षया जलाशय इत्येकत्वव्यवहारेपि॥ प्रत्ये
कवाप्यादिविवक्षया बहुनीजला॥ राम० ९

श्री

नीतिष्ठंतीति बहुत्वव्यवहारः॥ तथा सकलप्रपंचकारणस्याज्ञानस्य समुदायरूपेणैकत्वेपि अहंकारा
दिकारणीभूतानां जीवगताज्ञानानां प्रत्येकविवक्षया बहुत्वव्यवहार इत्यर्थः॥ अस्मिन्नर्थे श्रुतिं प्रमाणय
ति॥ इंद्रो मायाभिरिति श्रुतेः स्पष्टार्थः॥ ननु तथाप्येकस्यैवाज्ञानस्य तदवच्छिन्नचैतन्यस्य वा व्यष्टितासम
ष्टिता कुत इत्यत आह॥ अत्रेति॥ भेदविवक्षया व्यष्टित्वं मृत्पटादिवत्॥ अभेदविवक्षया समष्टित्वं मृ
त्पिंडवदित्यर्थः॥ तत्र महाप्रलयकालीनसमष्टिभूतविशुद्धसत्वप्रधानायाः मूलप्रकृतेः सकाशादेवं

इंद्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतेः॥ अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः॥
इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्वप्रधाना॥ एतदुपहितं चैतन्यं अल्पज्ञानीश्वरत्वादिगुणकं
प्राज्ञ इत्युच्यते॥ एकाज्ञानावभासकत्वात्॥ दानप्रलयकालीनव्यष्ट्युपाधिभूतजीवप्रकृतेर्भेदं
दर्शयति॥ इयमिति॥ इयं जीवगता सुषुप्त्यवस्था यत्राहंकारादिविक्षेपसंस्कारादिरूपा निकृष्टोपा
धित्वमलिनसत्वप्रधानेत्यर्थः॥ अनेनोपाधिना प्राज्ञत्वं चैतन्यं लक्ष्यति॥ एतदिति स्पष्टार्थः॥ अत्रो
पपत्तिमाह॥ ईश्वरगतमूलाज्ञानस्य जीवगतअहंकारादिविक्षेपसंस्कारादिरूपाज्ञानस्य चवस्क
तएकत्वेन तदवभासकत्वात्॥

वे॰ टी॰ ९

ईश्वरगतमूलाज्ञानस्य जीवगतअहंकारादिविक्षेपसंस्कारादिरूपाज्ञानस्य च व्यक्तत एकत्वेन तदवभास
केश्वरजीवचैतन्ययोरप्येकत्वमित्यर्थः॥ सोपि प्राज्ञजीवचैतन्यस्य प्राज्ञत्वं साधयति॥ अस्येति॥ संस्काररूपा
स्पष्टोपाधितया तदा हि तत्वेनातिप्रकाशकत्वाभावादस्याज्ञत्वमस्येत्यर्थः॥ यथा जगत्कारणेश्वरोपाधेः
कारणशरीरत्वं आनंदप्रचुरमयकोशत्वं कोशवत् शं तेन च कोशत्वं तथा॥ एतत्सर्वं तारतम्येन प्राज्ञे चैत

अस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वात् अस्यापीयमहंकारादिकारणत्वात्का
रणशरीरमानंदप्रचुरत्वात् केशवदाछादकत्वादेव हेतोरानंदमयकोशः॥ ॥

न्येप्यतिहिं दिशति॥ अहंकारादिति॥ प्रलयकाले हि रजःष्टोपाधितया तदाहृतत्वे हिरण्यगर्भादिप्र
पंचोत्पादकेश्वरस्य लयप्रकृतिवत् सुषुप्तिकाले ऽहंकारादिशरीरोत्पादकसंस्कारमात्रविशिष्टजीव
गतअज्ञानस्यापि कारणशरीरत्वं इंद्रियतद्विषयाभावेन व्याप्तगाभावादानंदबाहुल्यादानंदमयत्व
मात्माछादकत्वात् केशत्वं च युक्तमिति भावः॥ ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिश
ब्दवाच्यत्वमित्याशंक्य पूर्वविसंज्ञाभेदेन वस्तुभेदः स्वकृतं युक्तिमाह॥ सर्वोपरमत्वादिति॥ ॥ राम ९

पंचीकृतस्थूलशरीरस्य व्यावहारिकस्य अपंचीकृतसूक्ष्मशरीरे प्रातिभासिके प्रविलापितत्वात्तस्यापि प्रा
तिभासिकस्य स्वाप्नप्रपंचस्य स्वकारणे ऽज्ञाने लीनत्वात् सर्वोपरतिरित्यर्थः॥ तथा चोक्तं॥ लये फलस्य तद्धर्मी
कृता याः सुखसंगके। तस्यापि विलये नीरे तिष्टंत्येते यथापुरा॥१॥ व्यावहारिकजीवस्य लयस्थाप्रातिभास
कौ तत्क्षये सच्चिदानंदाः पर्यवस्यंति साक्षिणीति॥२॥ ननु प्रलयकाले सुषुप्तिकाले च अंतःकरणतद्धर्मा
भावेन आनंदग्राहकाभावादानंदप्राचुर्यसद्भावे प्रमाणाभावमाशंक्य परिहरति॥ तदानीमिति॥ य

सर्वोपरमत्वात्सुषुप्तिः अत एव स्थूलसूक्ष्मशरीरप्रपंचलयस्थानमिति कथ्यते॥ तदानीमेतावीश्व
रप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः॥ आनंदभुक् चेतोमुखः प्रा
ज्ञ इत्यादिश्रुतेः॥
यास्वच्छत्वेनांतःकरणस्य वृत्तिरंगीक्रियते तथा चैतन्यदीप्ताज्ञानस्यापि सूक्ष्मवृ
त्तयः स्वीक्रियंते॥ तथा च ईश्वरः स्वीयाज्ञानवृत्तिभिः स्वात्मानं बाहुल्येतारतम्येनानुभवतीति भावः॥
अत्रैवोपष्टंभकत्वेन श्रुतिमवतारयति॥ आनंदभुक् इति श्रुतिः स्पष्टार्थः॥ उत्तरकालीनसुखपराम
र्शानुपपत्तिरपि ह्यवानुभूतमुखावाहुल्यानुभवसद्भावे प्रमाणमित्याह॥ ॥

वे·टी० १० सुखमिति॥सुखमहमस्वाप्समित्यनेनपरामर्शः॥नकिंचिदवेदिषमितिअज्ञानपरामर्शः॥तथाचसुषु
प्तिदशायांप्रलयकालेचसमष्टिअभिप्रायेणप्राज्ञेश्वरावज्ञानवृत्तिभिरानंदमनुभवतावित्यर्थः॥इ
दानीमीश्वरगतसमष्ट्यज्ञानस्यजीवगतसंस्कारमात्रावशिष्टाज्ञानस्यचसमष्टिव्यष्टिअभिप्राये
णभेदमानेपिवस्तुतोभेदोनास्तीत्येतत्सदृष्टांतमाह॥अनयोरिति॥उक्तयोरुक्तिद्वयप्रकारेणेश्वरप्राज्ञ
सुखमहमस्वाप्संनकिंचिदवेदिषमित्युत्थितस्यपरामर्शोपपत्तेश्च॥अनयोर्व्यष्टिसमष्ट्योर्वनवृक्षयो
रिवजलाशयजलयोरिवचाभेदः॥एतदुपहितयोरीश्वरप्राज्ञयोरपिवनवृक्षावच्छिन्नाकाशयोरि
वजलाशयजलगतप्रतिबिंबाकाशयोरिवचाभेदः॥एषसर्वेश्वरइत्यादिश्रुतेः॥योरप्यभेदंदृष्टां
तमुखेनदर्शयति॥एतदिति॥ईश्वरस्यवनावच्छिन्नाकाशवत्प्राज्ञस्यवृक्षावच्छिन्नाकाशवच्चतत
थास्थूलजलाशयोपाध्यवच्छिन्नाकाशवत्॥तद्गतप्रतिबिंबाकाशवत्कारणोपाध्यवच्छिन्नेश्व
रस्येश्वरकार्योपाध्यवच्छिन्नेप्राज्ञस्यचवस्तुतोऽभेदएवेत्यर्थः॥तत्रप्रमाणमाह॥एषइति॥त राम· १०
थाचोक्तमाचार्यैः॥कार्योपाधिरयंजीवःकारणोपाधिरीश्वरः॥कार्यकारणतांहित्वापूर्णबोधो
विशिष्यतेइति॥

उपाधिद्वयावच्छिन्नौप्राज्ञेश्वरौसप्रपंचंनिरूप्येदानीमनवच्छिन्नंतुर्यचैतन्यंतल्लक्षयति॥वन
वृक्षइति॥यथास्थूलवनोपाध्यवच्छिन्नाकाशापेक्षयासूक्ष्मवृक्षोपाध्यवच्छिन्नाकाशापेक्षयाच
महाकाशस्यतदुभयाधारतयाअनवच्छिन्नत्वात्तुरीयत्वं॥तथाकार्यकारणोपाधितदवच्छिन्न
चैतन्यद्वयापेक्षयातदाधारभूतमपदनवच्छिन्नंसर्वव्यापिचैतन्यंविशुद्धंतुरीयमुच्यतेइत्यर्थः
वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयतद्गतप्रतिबिंबाकाशयोर्वाआधारानुपहिताकाशव
दनयोरज्ञानतदुपहितचैतन्ययोराधारभूतंयदनुपहितंचैतन्यंतत्तुरीयमित्युच्यते॥शिवंशांतं
अद्वैतंचतुर्थंमन्यंतइत्यादिश्रुतेः॥अस्मिन्नर्थेश्रुतिंसंवादयति॥शिवमिति॥आदिपदात्त्रिषुधा
मसुयद्भोग्यंभोक्ताभोगश्चयद्भवेत्तेभ्योविलक्षणःसाक्षिचिन्मात्रोहंसदाशिवइत्यादिश्रुत्यं
तरग्रहः॥अध्यारोपणन्यासकचिन्नतयाप्रकरणपरिस्मरणंमात्रादितिप्रसंगात्तमाह॥एत
देवविशुद्धंचैतन्यंतदेवब्रह्मेतिचैतन्यद्वयेनसहैकत्वविवक्षायांमहावाक्यस्यवाच्यत्वंलभते॥
भेदविवक्षायांचलक्ष्यत्वंलभतेइत्याह॥

रद्सिति॥ त्रयाणां चैतन्यरूपेणैकत्वेपि अनवच्छिन्नावच्छिन्नत्वेन रूपेण वाच्यलक्ष्यत्वे संभवत इति भा
वः॥ अथेदानीं स्वप्रकाशचिद्रूपस्यात्मनः कथं कुंठितप्रकाशत्वं कथं वाऽसंगोदासीनस्यात्मनः आ
काशादिप्रपंचजनकत्वमित्येतन्महाविरोधपरिहारायाज्ञानस्य शक्तिद्वयं निरूप्यते॥ अस्येति॥ ते
एवं निदिशति आवरणशक्तिस्तावत्॥ सच्चिदानंदस्वरूपमावृणोतीत्यावरणशक्तिं ब्रह्मादिस्वाव

इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिंडवत् अविविक्तं सन्महा
वाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते॥ अस्याज्ञानस्य आवरणविक्षेपनामकमिति

रांतं जगत् जलबुद्बुदन्नामरूपात्मकं विक्षिपति सृजतीति विक्षेपशक्तिरिति॥ शक्तिद्वयं॥
शक्तिद्वयमज्ञानस्येत्यर्थः॥ न च परिच्छिन्नस्य स्वप्रकाशचिद्रूपाखंडपरिपूर्णस्वरूपस्यात्म
नः॥ परिच्छिन्नेनानित्येन जडेनास्मो रूपेण च व्यापकेनाज्ञानशक्तिविशेषेण कथमावरण
मित्याशंक्य वस्तुतोऽज्ञानस्य आत्माच्छादकत्वमुपचारादुच्यत इत्याह॥ आवरणशक्तिरिति॥

तथाऽज्ञानं परिच्छिन्नमपि आत्मानमपरं परणे पचारादुपादानत्वं न विरुद्धत्व इत्यर्थः॥ यदुक्तं चैतन्यस्य
निमित्तकारणत्वेन निमित्तकारणविषयत्वाभावात्॥ तस्रष्टेत्यादिश्रुतेरप्युपादानकारणपरत्वात्॥
यदप्युक्तं आत्मानं उपादानकारणत्वेन विवर्त्तविषयत्वाभावात्॥ प्रपंचस्य ब्रह्मविवर्त्तत्वात्॥ वि
वर्त्तत्वं च स्वस्वरूपापरित्यागेन स्वरूपांतरप्रदर्शकत्वं॥ तथाऽश्वरचैतन्यनिष्ठाज्ञानशक्तेरपि

आवरणशक्तिस्तावदल्पोपि मेघो नेकयोजनमापतमादित्यमंडलमयलोकपितनयनपथ
विधायकतयाय यथाच्छादयतीव॥
तन्यस्व स्वरूपांतरकारेण प्रदर्शकत्वं॥ एतावता॥ आकाशा
दिप्रपंचस्यानित्यत्वं न संभवति॥ अज्ञानस्य मिथ्यास्वरूपत्वे तत्कन्याकाशादिप्रपंचस्यापि मिथ्या
त्वात्॥ न चैवमज्ञानस्य मिथ्यात्वेन तत्प्रयुक्तबंधमोक्षयोरपि मिथ्यात्वप्रसंग इति वाच्यं। इष्टापत्तेः॥
तदुक्तं भागवते॥ बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः। गुणस्य मायामूलत्वान्न मे मोक्षो न
बंधनं इति च लं विस्तरेण॥ एकस्यैवात्मनो निमित्तोपादानकारणत्वे दृष्टांतमाह॥

वे॰टी॰
१२

यथा लूतातंतुइति॥यथा लूता तंतुस्वोत्पद्यमानलक्षणं कार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधा
नतयोपादानं च भवति॥यथा लूता तंतुस्वोत्पद्यमानलक्षणं कार्यं प्रति स्वचैतन्यप्रधानतया नि
मित्तं॥चैतन्यसन्निधानव्यतिरेकेण जडस्य मृतशरीरवत्तंतुजनकत्वासंभवात्॥स्वशरीरप्राधा
न्येनोपादानं भवति।शरीरस्य साक्षात्तंतुजनकत्वासंभवात्॥स्वशरीरप्राधान्येनोपदानं च भव

तथाज्ञानं परिछिन्नमपि॥परिछिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाछादय
तीतिवताद्दृशं सामर्थ्यं॥यथा लूता तंतुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानत
योपादानं च भवति॥ ॥

तिशरीरस्य साक्षात्तंतूपादानत्वेन तदवछिन्नचैतन्यस्याप्युपादानत्वेनो
पचारात्॥एवमीश्वरस्यापि स्वचैतन्यप्रधानतया निमित्तत्वं स्वोपाधिप्रधानतयोपादानतयोपा
दानत्वेनोपचारात्॥एवमीश्वरस्यापि स्वचैतन्यप्रधानतया निमित्तत्वं स्वोपाधिप्रधानतयोपादा
नत्वं च भवतीत्यर्थः॥इदानीं विक्षेपशक्तिरूपमाह॥तमःइति॥॥ राम॰
१२

स्याकाशादेर्जडत्वात्तमोगुणप्रधानविक्षेपेनशक्तियुक्ताज्ञानावछिन्नचैतन्यस्यैव आकाशादिप्रपं
चजनकत्वमितिभावः॥अस्मिन्नर्थे श्रुतिं प्रमाणयति॥एतस्मादिति॥एतेनाद्यर्थात् सांख्यनैयायिकपक्षौ
निरस्तौ॥शक्तेरज्ञानस्य शक्तिमत्परतंत्रत्वात्॥स्वतंत्रस्य केवलस्य जडस्याज्ञानस्य जगत्कार
णत्वानुपपत्तेः॥ईक्षतेर्नाशब्दं रचनानुपपत्तेश्च नानुमानमित्यादिन्यायनिरस्तबुद्धिपिधायकत्व

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः॥आकाशाद्वायुः वायोरग्निः
अग्नेरापः अद्भ्यः पृथ्वी चोत्पद्यते॥एतदात्मनः आकाशः संभूत इत्यादिश्रुतेः॥ ॥

परिछिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाछादयतीति तादृशं सामर्थ्यं।यथा
अल्पोपि मेघो नेकयोजनविस्तीर्णमादित्यमंडलमवलोकयितृपुरुषदृष्टिमात्राछादकत्वे
नादित्यमाछादयतीत्युपचर्यते॥तथाज्ञानं तुछपरिछिन्नमप्यज्ञानप्रमातृबुद्धिमात्राछादकत्वे
नात्मानमाछादयतीतिउपचारादुच्यते इत्यर्थः॥अस्मिन्नर्थे वृद्धसंमतिमाह॥॥

ज

वे॰टी॰ १३

तदुक्तं घनछन्नत्वमिति॥ अनयैवावरणशक्त्या वच्छिन्नस्यात्मनः कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मक
तुच्छसंसारसंभावनापि संभाव्यते॥ इयमेवावरणशक्त्यात्मनो भेदबुद्धिजनकत्वेन संसारहेतुरिति भा
व॥ अत्रानुरूपदृष्टांतमाह॥ यदुक्तं असंगोदासीनस्यात्मनः॥ कथं जगत्कारणत्वमिति तन्निराक
र्तुं विक्षेपशक्तिस्वरूपमाह विक्षेपशक्तिरिति॥ यथा रज्जुविषयकमज्ञानं सर्पमुत्पादयति॥ तथा
घनछन्नदृष्टिर्घनछन्नमर्कं यथा मन्यते निःप्रभं चातिमूढः॥ तथा बद्धवद्भाति यो मूढदृष्टेः स
नित्योपलब्धिस्वरूपोहमात्मेति॥ अनयावृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसा
रसंभावना अपि संभवति॥ यथा स्वाज्ञानेनावृतायां रज्जौ सर्पत्वसंभावयति॥ विक्षेपशक्तिस्तु यथा
रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति॥ एवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्या
आकाशादिकं प्रपंचमुद्भावयति तादृशं सामर्थ्यं॥ त्मविषयकमज्ञानमपि स्वावच्छिन्ने आकाशादि राम॰
कं प्रपंचमुद्भावयतीति तादृशं सामर्थ्यं॥ यथा रज्जुविषयकमज्ञानं सर्पमुत्पादयति। तथात्मविषय १३
कमज्ञानमपि स्वावच्छिन्ने आत्मन्यति विक्षेपशक्तिप्रभावेनाकाशादिकं प्रपंचमुत्पादयतीत्यर्थः॥

अस्मिन्नर्थे ग्रंथांतरसंमतिं दर्शयति॥ तदुक्तं॥ विक्षेपशक्तिरिति॥ ननु किमात्मा चराचरात्मकप्रपंचस्य नि
मित्तकारणं तु उपादानकारणं नाद्यः दंडादिवत्तस्य कार्यव्यापित्वं न स्यात्॥ आत्मनः तत्सृष्ट्वा तदेवानुप्रावि
शदिति श्रुत्या स्वकार्यव्यापित्वश्रवणात् न द्वितीयः॥ अचेतनस्य जडस्य चैतन्योपादानकत्वासंभवात्॥ उपा
दानमेतेन च कार्यकर्मणयोरभेदेन प्रपंचस्यापि चैतन्यरूपत्वप्रसंगादनित्यत्वं न स्यादित्याशंक्याप्र
ड प्रपंचे स्यात्मनः चैतन्यप्राधान्येन निमित्तत्वं स्वाज्ञानप्राधान्येनोपादानत्वं संभवतीत्याह॥ श
विक्षेपशक्तिर्लिंगादि ब्रह्मांडांतं जगत्सृजेदिति॥ शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया
निमित्तं सोपाधिप्रधानतयोपादानं च भवति॥ शक्तिद्वयवदिति॥ यथा अयस्कांतसन्निधानेन जड
मयं लोहं चेष्टते तथा चैतन्यसन्निधानेन जडमयं अज्ञानं चेष्टते इत्यज्ञानविकारं प्रति चैतन्यस्य निमि
त्तत्वं जडाकाशादिकार्यं प्रति मायायाः साक्षादुपादानत्वेन मायाविनः॥ ईश्वरस्यापि परत्वाच्चाप
रमाणोरप्युक्तदोषग्रासत्वासावपापात्॥ अभिन्ननिमित्तोपादानप्रतिपादकश्रुतिस्मृतिन्यायवि
रोधाच्च॥ यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति॥॥

सदेव सौम्येदमग्र आसीत्॥ एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्त
ते॥ बीजं मां सर्वभूतानामित्यादिश्रुतिस्मृतिभिरीश्वरस्यैव जगत्कारणत्वप्रतिपादनात्॥ न चाकाशादि
प्रपंचोत्पादकत्वे तस्यावच्छेदाकाशादेकुतस्त्यामः॥ प्राधान्यमित्याशंक्याह॥ तेष्विति॥ कारणगुणा हि का
र्यगुणानारंभंत इति न्यायादिति भावः॥ ननु त्रिगुणात्मकत्वादज्ञानस्य कथं तमोगुणप्राधान्यं तत्र

तेषु जाड्यादिकदर्शनात्तमःप्राधान्यं तत्कारणस्य। तदानीं सत्वरजस्तमांसि कारणगुण
प्रक्रमेण तेष्वाकाशादिषूत्पद्यंते॥ एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपंचीकृतानि चोच्यं
काशादिजनकत्वमित्याशंक्याह॥ तदानीमिति॥ तदानीमुत्पत्तिवेलायां सत्वादयस्त्रयो ते॥ ॥
पि गुणास्तारतम्येन कारणप्रक्रमन्यायेन तेष्वाकाशादिषु पंचसु तेषु उत्तरोत्तराधिक्येन जायंत इत्य
र्थः॥ इमान्येव सूक्ष्मशरीरादिकारणभूतोपाधीकृतानि सूक्ष्मरूपभूततन्मात्राणि तु च तेइत्याह।
एतान्येवेति॥ तदुक्तं पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं। अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसा
धनमिति॥ वचनादीपेअपंचीकृतभूतेभ्योऽपंचीकृतसूक्ष्मशरीराणि॥

पंचीकृतस्थूलभूतेभ्यः स्थूलशरीराणि चोत्पद्यंते इत्याह॥ एतेभ्यः इति॥ स्पष्टार्थः॥ सूक्ष्मशरीरस्वरूपभूता
नवयवान्॥ अवयवा इति॥ सात्विकांशादाकाशाच्छ्रोत्रमुत्पद्यते। सात्विकांशाद्वायोस्त्वक्॥ सात्विकां
शात्तेजसश्चक्षुः॥ सात्विकांशाज्जलाज्जिह्वा। सात्विकांशात्पृथिव्याः सकाशात्॥ घ्राणेंद्रियं क्रमेणोत्प
द्यंते इत्याह॥ एतानीति॥ स्पष्टार्थः॥ बुद्धेर्लक्षणमाह॥ बुद्धिरिति॥ ब्रह्मैवाहमिति निश्चयात्मिकेवांतः

एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यंते॥ सूक्ष्मशरीराणि सप्तदशावयवानि लिंगशरीराणि।
अवयवास्तु ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं चेति॥ ज्ञानेंद्रियाणि श्रोत्रत्व
क्चक्षुर्जिह्वाघ्राणाख्यानि॥ एतानि पुनराकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक्क्रमे
णोत्पद्यंते॥ बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः॥ मनो नाम संकल्पविकल्पात्मिकांतःक
रणवृत्तिः॥ करणवृत्तिरेवमनइत्यर्थः॥ मनसो लक्षणमाह॥ मन इति॥ अहंचिद्रूपो देहो वा इ
ति संशयात्मिकांतःकरणवृत्तिरेव मन इत्यर्थः॥ स्मरणात्मकचित्तस्य गर्वात्मिहंकारस्य बुद्धिम
नसोरंतर्भाव इत्याह॥ अनयोरिति॥ ॥

वे०टी० १५ यद्यप्यंतःकरणत्वेन चतुर्णामेकत्वं तथाप्येकस्यैव पुरुषस्य पाचकः॥ पावक इत्यादिवन्निमित्तभेदाद्भे
दवदेकस्याप्यंतःकरणस्यापि संशयनिश्चयस्मरणादहंकारविषयभेदे बुद्ध्यादिभेद इत्यर्थः॥ बुद्ध्यादी
नां उत्पत्तिप्रकारं दर्शयति॥ एते इति॥ एतेषां चतुर्णां सात्त्विकांशाभूतेभ्यः॥ उत्पन्नौ निमित्तमाह॥
एतेषामिति॥ बुद्ध्यादीनां प्रकाशात्मकत्वात् सात्त्विकांशभूतकार्यमित्यर्थः॥ बुद्धेर्विज्ञानमयको
शत्वं नयोरेव चित्ताहंकारयोरंतर्भावः॥ एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यो
उत्पद्यन्ते॥ एतेषां प्रकाशात्मकत्वात् सात्त्विकांशकार्यत्वं॥ इयं बुद्धिर्ज्ञानेंद्रियैः सहिता वि
ज्ञानमयकोशो भवति॥ अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेन इहपरलो
कगामी व्यावहारिको जीव इत्युच्यते॥॥ ज्ञात्वं दर्शयति॥ इयमिति॥ बुद्धेः सत्त्वका जीवत्वं दर्शयति।
अयमिति॥ तप्तायःपिंडवत् बुद्ध्यारोपितं चैतन्यं वक्ष्यमाणं कर्तृभोक्तृनित्यानंदाद्यपरिच्छिन्नम राम १५
क्रियमपि भोक्तृत्वकर्तृत्वसुखित्वदुःखित्वपरिच्छिन्नत्वक्रियावत्त्वाद्यभिमानेन स्वर्गादिलो
कांतरगामित्वव्यावहारिकजीवत्वं भजत इत्यर्थः॥ ॥

मनोमयकोशं निरूपयति॥ मन इति॥ अत्र मनसः सत्त्वोपहितरजोविकारेच्छारूपत्वात् संकल्पवि
कल्पात्मकत्वेन बुद्ध्यपेक्षया जन्माधिक्यान्मनोमयत्वं॥ आत्माच्छादकत्वात् कोशत्वमिति भावः॥ क
र्मेंद्रियाण्युपदिशति॥ कर्मेंद्रियाणीति॥ स्पष्टार्थः॥ एतेषामुत्पत्तौ साधनापेक्षमाह॥ एतानीति॥
भूतानां त्रिगुणत्वेपि रजोगुणबाहुल्येभ्यो भूतेभ्यो वागादीनि पृथक्पृथक्क्रमेण जायंते॥ रजो
मनसस्तु कर्मेंद्रियैः सहितं सन्मनोमयकोशः॥ कर्मेंद्रियाणि वाक्पाणिपादपायूपस्थाख्या
नि॥ एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते॥ वायवः प्रा
णापानव्यानोदानसमानाश्चेति॥ प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती॥ अपानो ना
म अधोगमनवान् पाय्वादिस्थानवर्ती॥ गुणप्रधानोदये पादेंद्रियं रजोगुणप्रधानाज्जातत्वात्पि
ण्डे॥ रजोगुणप्रधानात्पृथिव्याः उत्पन्नेंद्रियमुत्पद्यत इत्यर्थः॥ वायूनुपदिशति॥ वायुरिति स्पष्टा
र्थः॥ यथोद्देशं प्राणस्य लक्षणमाह॥ ऊर्ध्वगमनशीलो नासाग्रस्थायी वायुः प्राण इत्यर्थः॥ अपान
स्य लक्षणमाह॥ अपान इति॥ अधोगमनशीलः पाय्वादिस्थायी वायुरपान इत्यर्थः॥ ॥

वे॰टी॰
१६

व्यानस्य लक्षणमाह॥ व्यान इति॥ सर्वनाडीगमनशीलोऽखिलशरीरव्यापी वायुर्व्यान इत्यर्थः॥ उदा
नस्य लक्षणमाह॥ उदान इति॥ ऊर्ध्वमुत्क्रमणशीलः कंठस्थायी वायुरुदान इत्यर्थः॥ समानस्य लक्षण
माह॥ समान इति शरीरमध्यगतान्नरसादिनेता वायुः समान इत्यर्थः॥ प्राणादीनां वायुत्वेन रूपेणैकत्वे
पि क्रियाभेदेन भेद इत्यर्थः॥ कपिलमतानुसारिणः क्रियाभेदेनान्येपि पंच वायवः संतीति वदंतीत्या
व्यानो नाम विष्वग्गमनवान् अखिलशरीरवर्ती॥ उदानः कंठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवा
युः॥ समानः शरीरमध्यगोऽशितपीताद्यादिसमीकरणकरः॥ केचित्तु नागकूर्मकृकलदेवदत्तध
नंजयाख्याः पंचान्ये वायवः संतीति वदंति॥ नागः उद्गिरणकरः॥ कूर्मः उन्मीलनकरः॥ कृकलः
क्षुधाकरः॥ देवदत्तो विजृंभणकरः॥ धनंजयः पोषणकरः॥
ह॥ तान्येव नामाभिर्निर्दिशति॥ नाग नि
इत्यादिना स्पष्टार्थः॥ तथा चोक्तं॥ उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः॥ कृकलः क्षुति राम
ज्ञेयो देवदत्तो विजृंभणे॥ न जहाति मृतस्यापि सर्वव्यापि धनंजय इति॥ वेदांतिनस्तु॥ नागादी १६
नां प्राणादिष्वंतर्भावं वदंतीत्याह॥ एतेषामिति॥ ॥

प्राणादिवायूनामुत्पत्तौ कारणापेक्षयामाह॥ एतदिति॥ अपंचीकृतपंचमहाभूतेभ्यो रजः प्राधा
न्येन रजसः प्राणादयो जायंत इत्यर्थः॥ एतेषां प्राणादीनां प्राणप्रचुरत्वात् प्राणमयत्वं॥ आत्माच्छाद
कत्वाच्च कोशत्वं च भवतीत्याह॥ इदमिति॥ स्पष्टार्थः॥ प्राणादीनां रजःप्रधानभूतः कार्यत्वे नि
मित्तमाह॥ अस्येति॥ प्राणादीनां क्रियात्मकत्वात् रजःकार्यत्वमित्यर्थः॥ एतेषु पंचसु कोशेषु
एतेषां प्राणादिष्वंतर्भावात् प्राणादयः पंचैवेति केचित्॥ एतत्प्राणादिपंचकमाकाशादिग
तरजोंशेभ्यो मिलितेभ्य उत्पद्यंते॥ इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं प्राणमयकोशो भव
ति॥ अस्य क्रियात्मकत्वात् रजोंशकार्यत्वं॥ एषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान्
कर्तृरूपः मनोमय इच्छाशक्तिमान् कारणरूपः॥ मध्ये विज्ञानमयं मनोमयप्राणमयको
शानां क्रमेण ज्ञानेच्छाक्रियाशक्तिभेदेन कर्तृकरणक्रियारूपित्वं दर्शयति॥
ध्ये विज्ञानमयकोशानां क्रमेण ज्ञानेच्छाक्रियाशक्तिभेदेन कर्तृकरणक्रियारूपित्वं दर्शयति॥ एतेषु कोशेषु म
एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः मनोमय इच्छाशक्तिमान् कारणरूपः॥

प्राणमयः क्रियाशक्तिमान्कार्यरूपः॥ तत्र हेतुमाह॥ योग्यत्वादितिस्पष्टार्थः॥ इदमेव कोशत्रयं सूक्ष्म
शरीरमिति व्यवह्रियत इत्याह॥ कोशत्रयमिति स्पष्टार्थः॥ अस्य समष्टित्वे हेतुमाह॥ अत्रापीति॥ एकबुद्धी
ति चराचरप्राणिमात्रस्य यान्यनंतानि सूक्ष्मशरीराणि तेषां सूक्ष्मशरीराणां सूत्रात्मा हिरण्यगर्भाख्ये
न स्वीयैकबुद्धिविषयीकृतत्वात्समष्टित्वमित्यर्थः॥ तत्र दृष्टांतमाह॥ वनवदितिस्पष्टार्थः॥ अस्यैव सू

प्राणमयः क्रियाशक्तिमान्कार्यरूपः॥ योग्यत्वादेवमेतेषां विभाग इति वर्णयंति॥ एतत्कोशत्रयं मि
लितं सूक्ष्मशरीरमित्युच्यते॥ अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयव
द्वा समष्टिः॥ अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरिति भवति॥ एतत्समष्ट्युपहितं चैत
न्यं सूत्रात्मा हिरण्यगर्भः प्राण इति चोच्यते॥ सर्वत्रानुस्यूतत्वात्॥ ॥ क्ष्मशरीरस्य व्यष्टित्वं दर्शय

ति॥ अनेकेति॥ अनेकेषां जीवानां प्रत्येकं स्वस्वलिंगशरीरस्य स्वबुद्धिविषयतया व्यष्टित्वमित्य
र्थः॥ तत्र दृष्टांतमाह॥ वृक्षवदित्यादि॥ उक्तः समष्ट्यवच्छिन्नचैतन्यस्य सूत्रात्मत्वादि सं
ज्ञां दर्शयति॥ एतदिति स्पष्टार्थः॥ तत्र हेतुमाह॥ सर्वत्रेतिस्पष्टार्थः॥ ॥

हेत्वंतरमाह॥ ज्ञानेच्छेति॥ कोशत्रयोपाध्यवच्छिन्नत्वादित्यर्थः॥ विज्ञानमयादिकोशत्रयस्य सूक्ष्मश
रीरतां दर्शयति॥ अस्येति॥ अस्य सूत्रात्मा हिरण्यगर्भाख्यस्य विज्ञानमयादिकोशत्रयं॥ अस्य स्थूलप्र
पंचापेक्षया सूक्ष्मत्वादित्यर्थः॥ अस्यैव विज्ञानमयादिकोशत्रयस्य स्वप्नत्वे युक्तिमाह॥ जाग्रदिति॥
विराट्स्वरूपेणानुभूतस्थूलप्रपंचविषयवासनामयत्वात्स्वप्नत्वमस्येत्यर्थः॥ यतः स्वप्नत्वं सूक्ष्म

ज्ञानक्रियाशक्तिमदुपहितत्वाच्च॥ अस्यैषा समष्टिः स्थूलप्रपंचापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं वि
ज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नः॥ अत एव स्थूलप्रपंचलयस्थानमिति चोच्य
ते॥ एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति॥ तेजोमयांतःकरणोपहितत्वात्॥ अस्यापीयं व्यष्टिः
स्थूलशरीरापेक्षया सूक्ष्मत्वादितिहेतोश्च सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासना
मयत्वात्स्वप्नः॥

त्वं च अत एव स्थूलप्रपंचलयस्थानमित्युच्यत इत्यर्थः॥ विज्ञानमयादिसमयादिस
मष्ट्युपाध्यवच्छिन्नचैतन्यं तैजसो भवति॥ तत्र हेतुमाह॥ तेज इति॥ व्यष्टिरूपं विज्ञानमयादिकोशत्रयं ते
जसस्यापि सूक्ष्मशरीरमिति दर्शयति॥ अस्यापीति सूक्ष्मशरीरलयकवासनामयत्वात्स्वप्नमित्यर्थः॥

अस्यैव सूक्ष्मशरीरस्य स्थूलशरीरलयस्थानत्वे युक्तिमाह॥ यथा पूर्वं प्राज्ञेश्वरावज्ञानवृत्तिभिः सुषुप्त
वस्थायां आनंदमनुभवतः॥ तथा हिरण्यगर्भतैजसावपि स्वप्नावस्थायां मनोवृत्तिभिर्वासनामय
शब्दादिविषयाननुभवतः इति दर्शयति॥ एतावितिं॥ स्पष्टार्थः॥ अस्मिन्नर्थे श्रुतिमुदाहरति॥
प्रविविक्तभुक् इति॥ प्रविविक्तं भुंक्ते इति प्रविविक्तभुक् तैजसः तैजोंतःकरणं कार्यभावेन परिणीतं त
त एव स्थूलशरीरलयस्थानमिति चोच्यते॥ एतौ सूत्रात्मा तैजसौ तदानीं मनोवृत्तिभिः
सूक्ष्मविषयाननुभवतः इति॥ प्रविविक्तभुक् तैजस इत्यादि श्रुतेः॥ अत्रापि समष्टिव्यष्ट्योस्तदु
पहितसूत्रात्मा तैजसयोर्वनवृक्षवन्नदवच्छिन्नाकाशवच्च जलाशयजलवत्तत्प्रति
बिंबाकाशवच्चाभेदः देवस्थूलशरीरादिहानं यस्य सः तैजसः तैजोंतःकरणस्वामी इत्यर्थः॥ इ
हात्रापि विज्ञानमयादिकोशत्रयस्य समष्टिरूपस्य तदवच्छिन्नसूत्रात्मनश्च व्यष्टिरूपविज्ञानम
यादिकोशत्रयस्य तदवच्छिन्नतैजसस्य चैतन्यस्य च वनवृक्षादितदवच्छि
न्नाकाशादिदृष्टांतमुखेनाभेदं दर्शयति॥ उपाधिद्वयावच्छिन्नचैतन्ययोः सूत्रा॥

त्मतैजसयोरपि वनवृक्षावच्छिन्नाकाशवच्च जलाशयजलगतप्रतिबिंबाकाशवच्चाभेद इत्यर्थः॥ सूक्ष्म
शरीरोत्पत्तिप्रकरणमुपसंहरति॥ एवमिति॥ स्पष्टार्थः॥ अथेदानीं स्थूलशरीरोत्पत्तिं निरूपयितु
मुपक्रमते॥ स्थूलेति॥ तु शब्दः पूर्वस्माद्वैलक्षण्यं द्योतयति॥ पंचीकृतानीति अपंचीकृतसूक्ष्मभूतापेक्ष
या स्थूलभूतानि पंचीकृतानीत्यर्थः॥ पंचीकरणमेव प्रतिपादयितुं प्रतिजानीते॥ पंचीकरणमि
ति॥ पंचीकरणप्रकारमाह॥ अयमर्थः॥ सृष्टिकाले सकलप्राण्यदृष्टवशादीश्वरप्रेरणया॥
एवं सूक्ष्मशरीरोत्पत्तिः॥ स्थूलभूतानि पंचीकृतानि॥ पंचीकरणं तु॥ आकाशादिपंचकमे
केकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पंचभागान् प्रत्येकं चतुर्धा समं विभ
ज्यते षां चतुर्णां भागानां स्वस्वद्वितीयभागपरित्यागेन भागांतरेषु योजनं॥ आकाशवायु
तेजोपां वास्यादि अविद्यामहायम्नतात्परमात्मनः सकाशादनुक्रमजातानि तान्यपंचीकृतानि सू
क्ष्माणि व्यवहारासमर्थानीति कृत्वा तदीयसंहत्यापेक्षायां भवद प्राणिजातधर्मापेक्षया एता
न्येव भूतानि पंचीकृतानि भवंति॥ तानि प्रत्येकं द्वैविध्यमापद्यंते॥ तेषामाकाशादिषु दशसु भागेषु प्र
थमिकान् पंचभागान्॥

वे० टी० १९ प्रत्येकं चतुर्ष्वसमं विभज्य स्वार्धपरित्यागेन चतुर्णां प्रत्येकं भागांतरेषु संनिवेशेन पंचीकृतानि भवं
ति॥ अस्मिन्नर्थे वृत्तसंख्यमतिमाह॥ उक्तमिति॥ पंचीकरणस्य त्रिवृत्करणप्रतिपादकश्रुतेतरविरोधमा
शंक्य परिहरति॥ अस्येति स्पष्टार्थः॥ पंचीकरणस्यापि भूतत्रयसृष्टिः॥ कृतौसृष्टिपरिपूर्णार्थे अन्य
त्र श्रुतमपि भूतद्वयं माश्रित्य भूतपंचकाभिप्रायेण भूतत्रयसृष्टिप्रतिपादनादविरोध इत्यर्थः॥

उक्तं द्विधाय चैकैकं चतुर्धा प्रथमं पुनः॥ स्वस्वेतरद्वितीयांशैर्योजनं पंच पंच चेति॥ अस्याप्रा
माण्यं नाशंकनीयं त्रिवृत्करणमिति श्रुतेः॥ पंचीकरणस्याप्युपलक्षणत्वात्॥ पंचानां पंचात्म
कत्वे समानेपि वैशेष्यात्तद्वादस्तद्वादस्यायेन आकाशादिव्यपदेशः संभवति॥ ॥ ॥

आकाशादि पंचभूतेषु चतुर्धा विभक्तानां मध्ये पांचभूतानां प्रत्येकानुप्रवेशेन पंचीकृताना
माकाशादीनां पंचात्मकत्वाविशेषादाकाशादिव्यपदेशोनस्यादिति आशंक्य परिहरति॥ पंचा
नामिति॥ आकाशादीनां पंचात्मकत्वे समानेपि तेषु च वैशेषोनुप्रवेशात्तन्नामभिर्व्यवहा राम० १९
रः संभवतीत्यर्थः॥ ॥

पदा पंचीकृतान्याकाशादीनि तदानीं स्थूलत्वेन स्वस्वकार्योत्पादनासमर्थत्वात्काशेः अव्यक्तरूपे
णास्थितः शब्दोभिव्यज्यते अभिव्यक्तो भवतीत्यर्थः॥ उक्तेभ्यो भूतेभ्यश्चतुर्दशभुवनोत्पत्तिप्रकारं
दर्शयति॥ एतेभ्यः इति॥ एतेभ्यो भूतेभ्यः समुत्पन्नं ब्रह्मांडस्य चतुर्विधशरीराणां चतद्योग्यान्न

तदानीमाकाशे शब्दोभिव्यज्यते॥ वायौ शब्दस्पर्शौ अग्नौ शब्दस्पर्शरूपाणि॥ अप्सु शब्द
स्पर्शरूपरसाः॥ पृथिव्यां शब्दस्पर्शरूपरसगंधाश्च॥ ॥ एतेभ्यो पंचीकृतेभ्यो भूतेभ्यो भुर्भुवः
स्वर्महर्जनतपःसत्यमित्येतन्नामकानामुपर्युपरिविद्यमानानामतलवितलसुतलरसातलत
लातलमहातलपातालानामनेकानामधोधोविद्यमानानां लोकानां ब्रह्मांडस्य चतुर्वि
धशरीराणां चतुर्दुपहितामन्नपानादीनां चोत्पत्तिर्भवति॥ चतुर्विधशरीराणि तु जरायुजां
डजोद्भिज्जस्वेदजाख्यानि॥॥ पानादीनां चोत्पत्तिर्भवतीत्यर्थः॥ चतुर्विधशरीराण्युपदिशति॥
चतुर्विधशरीराणीति॥ तानि च यथोद्देशं विवृणोति॥ जरायुजेभ्यो जातानि मनुष्यपश्वादी
नि॥ अंडजानि अंडेभ्यो जातानि पक्षिपन्नगादीनि॥ उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षलता
दीनि॥

स्वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि ॥ पूर्ववदत्रापि समष्टिव्यष्टिभेदं दर्शयति ॥ अत्रापीति ॥ चतुर्विधशरीरजातमपि शरीरमित्येकबुद्धिविषयतया वनवत्समष्टित्वं प्रत्येकं तच्छरीरविषयतयाऽनेकबुद्धिविषयत्वात् वृक्षवद्व्यष्टित्वं च लभत इत्यर्थः ॥ अधुना नरादिचतुर्दशभुवनान्तर्गतचतुर्विधस्थूलशरीरं समष्ट्युपहितचैतन्यस्य वैश्वानरादिपर्यायं वैराजत्वं दर्शयति ॥ एतदिति स्पष्टार्थः ॥ तत्र युक्तिमाह ॥ सर्वप्राणिनिकायेष्वहमित्यभिमानवत्त्वाद्वैश्वानरत्वं विविधं नानाप्रका

श्चात्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिविषयतया वनजलाशयवद्वा समष्टिर्वृक्षवज्जलवद्वा व्यष्टिरपि भवति ॥ एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडिति चोच्यते ॥ सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च ॥ अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयकोशः ॥ रेण प्रकाशमानत्वाच्च वैराजत्वं लभत इत्यर्थः ॥ अस्येति अस्य विराट्चैतन्यस्य एषा पूर्वोक्ता यावद्ब्रह्माण्डान्तर्गतचतुर्विधं स्थूलशरीरमित्यर्थः ॥ अन्नेति ॥ अन्नविकारबाहुल्यादन्नमयत्वं ॥ आत्माच्छादकत्वात्कोशत्वं स्थूलशरीरादिविषयप्रयुक्तं सुखदुःखभोगायतनत्वाच्च ॥

स्थूलशरीरत्वं ॥ इन्द्रियैरर्थोपलब्धेः जाग्रदवस्था च घटत इत्यर्थः ॥ चतुर्विधस्थूलशरीरं समष्ट्युपहितं चैतन्यसप्रपंचमभिधाय इदानीं तद्व्यष्ट्युपहितचैतन्यमभिधत्ते ॥ एतदिति ॥ एतेषां चतुर्विधशरीराणां या व्यष्टिस्तत्र तच्छरीरव्यक्तिस्तदुपहितं चैतन्यं विश्व इत्युच्यते ॥ तत्र हेतुमाह ॥ सूक्ष्मइति ॥ सूक्ष्मशरीराभिमानं परित्यज्य स्थूलशरीरेषु सर्वेषु प्रत्येकमहमित्यभिमानवत्त्वाद्विश्वमित्यर्थः ॥ अस्य

स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदित्युच्यते ॥ एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते ॥ सूक्ष्मशरीराभिमानं परित्यज्य स्थूलशरीरादिप्रविष्टत्वात् ॥ अस्याप्येषा व्यष्टिः स्थूलशरीरं अन्नविकारत्वादेव हेतोरन्नमयकोशो जाग्रदित्युच्यते ॥

चैतन्यस्याप्येषा तच्छरीरव्यक्तिविशेषलक्षणव्यष्टिः सा एव स्थूलशरीरमित्यर्थः ॥ अत्राप्यन्नविकारबाहुल्यादन्नमयत्वं चैतन्याच्छादकत्वात्कोशत्वं इंद्रियैरर्थोपलब्धेर्जाग्रत्वं च क्रमेण दर्शयति ॥ अन्नविकारादिति स्पष्टार्थः ॥ अधुना जाग्रदवस्थायां विश्ववैश्वानरयोः स्वस्वदेवताधिष्ठितश्रोत्रादिभिश्चतुर्दशभिः रंतःकरणैः शब्दादिविषयग्रहणप्रकारं दर्शयति ॥ ॥

वे०टी०

२१

तदानीमितिस्पष्टार्थः॥अस्मिन्नर्थेश्रुतिंसंवादयति॥जनयोविश्वानरयोर्वनवृक्षावच्छिन्नाकाशं
तेनजलाशयजलगतप्रतिबिंबाकाशदृष्टांतेनपूर्ववदभेदंसाधयति॥अत्रापीति॥स्पष्टार्थः॥भेदः
तदानीमेतौविश्ववैश्वानरौदिग्वातार्कवरुणाश्विभिः॥क्रमान्नियंत्रितेनश्रोत्रादींद्रियपंचके
नक्रमाच्छब्दस्पर्शरूपरसगंधाननुभवतु॥अग्नींद्रोपेंद्रयमप्रजापतिभिःक्रमान्नियंत्रितेनवाग
दींद्रियपंचकेनक्रमाद्वचनादानगमनविसर्गानंदादीन्चंद्राच्युतचतुर्मुखशंकराच्युतैःक
द्वि मान्नियंतेनमनोबुद्ध्यहंकारचित्ताख्येनअंतरिंद्रियचतुष्टयेनक्रमात्संकल्पनिश्चयाहंकृ
तिचिंत्यांश्चसर्वानेतान्स्थूलशरीरविषयाननुभवतः॥जागरितस्थानोबहिःप्रज्ञइत्या
दिश्रुतेः॥अत्राप्यनयोःस्थूलयोरपिसमष्ट्यात्मदुपाहितविश्ववैश्वानरयोश्चवनवृक्षतदवच्छिन्ना
काशवदभेदः॥जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्चपूर्ववदभेदः॥एवंपंचीकृत
भूतेभ्यःस्थूलप्रपंचोत्पत्तिः॥ ॥स्थूलप्रपंचोत्पत्तिमुपसंहरति॥एवमिति॥स्थूलसूक्ष्मका राम. २१
रणप्रपंचानांव्यष्टीनांतानांसमष्टीनांतानांप्रत्येकविवक्षयाअवांतरप्रपंचत्व॥

मभिधायेदानींतेषांसमष्टिरेकोमहाप्रपंचस्त्वंदर्शयति॥एतेषामितिस्पष्टार्थः॥तत्रदृष्टांत
माह॥यथेति॥यथाधवखदिरपलाशाद्यवांतरवनानांसमष्टिसमुदायविवक्षयाएकंमहद्वनं
भवति॥यथावापीकूपतडागाद्यवांतरजलाशयानांसमुदायविवक्षयाएकोमहाजलाशयोभ
वति॥तथास्थूलसूक्ष्मकारणावांतरप्रपंचानांसमुदायएकोमहान्प्रपंचोभवतीत्यर्थः॥एत
एतेषांस्थूलसूक्ष्मकारणप्रपंचानामपिसमष्टिरेकोमहाप्रपंचोभवति॥यथावांतरव
नानांसमष्टिरेकंमहद्वनंभवति॥यथावांतरजलाशयानांसमष्टिरेकोमहाजलाशयः॥एतदुप
हितंचैतन्यंवैश्वानरादीश्वरपर्यंतंचैतन्यमप्यवांतरवनावच्छिन्नाकाशवदवांतरजलाशयगतजलग
तप्रतिबिंबाकाशवच्चैकमेव॥आभ्यांमहत्प्रपंचतदुपहितचैतन्याभ्यांतप्तायःपिंडवदविविक्तं
सदनुपहितंचैतन्यं॥देवावांतरमहाप्रपंचोपहितानांविश्वतैजसप्राज्ञानांविश्वानरहिरण्यग
र्भाव्याकृतानांचावांतरवनावच्छिन्नाकाशवदवांतरजलाशयप्रतिबिंबाकाशवच्चाभेदइत्याह
एतदितिस्पष्टार्थः॥चैतन्यप्रपंचयोर्भेदंसर्वंखल्विदंब्रह्मेतिश्रुत्याविरोधमाशंक्यपरिहरति

आत्मामिति॥ उक्तमहत्प्रपंचतदवच्छिन्नचैतन्यात्मा तप्तायःपिंडवदन्योन्यतादात्म्याध्यासापन्नं यदस्तु अ
तं तदवच्छिन्नं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भवति। अन्योन्यतादात्म्याध्यासेनापि सल्लक्ष्यं भ
वतीतिरित्यर्थः॥ अध्यारोपप्रकरणमुपसंहरति॥ एवमिति॥ अस्यार्थः॥ इत्थं परचैतन्ये सामान्यतो महाप्र
पंचाध्यारोपं आह॥ इदमिति॥ अस्यार्थः॥ अतिप्राकृतस्तु प्रत्यक्षादिसन्निहितं स्वापत्यादि धर्मिणं

सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भवति॥ विविक्तं सल्लक्ष्यमपि भवति॥ एवं वस्तुन्यवस्त्वारोपः
सामान्येन प्रदर्शितः॥ इदानीं प्रत्यगात्मनि इदमिदमयमारोपयतीति विशेषतः उच्यते॥ अ
तिप्राकृतस्तु आत्मा वै जायते पुत्र इत्यादिश्रुतेः॥ स्वस्मिन्निव स्वपुत्रेपि प्रियत्वदर्शनात्पुत्रेन
ष्टेचाहमेव पुत्रो नष्टश्चेत्यनुभवदर्शनात् पुत्र आत्मेति वदति॥ इदमितिनिर्देशः क्रियते। आदरे
वीप्सा॥ तथा च॥ अतिस्थूलबुद्धिस्तु इदमपत्यादिकमेवाहं॥ अयं पुत्रमेवाह इत्यंतबात्यधर्मावि
शेषेणात्मन्यध्यारोपयतीत्यर्थः॥ अत्र श्रुतिमाह॥ आत्मेतिस्पष्टार्थः॥ तत्र युक्तिमाह॥ यथा स्वश
रीरे प्रेमदर्शनादात्मत्वभ्रम इत्यर्थः॥ एवं सपुत्रादिशरीरेपि प्रेमदर्शनादात्मत्वभ्रम इत्यर्थः॥

श्चानुरूपमनुभवमाचष्टे॥ पुत्र इति॥ एतदपेक्षया विशिष्टवद्धिरन्यः कश्चिदधिकारी स्वदेहमेवा
त्मानं मन्यते इत्याह॥ चार्वाकस्तु अत्रापि श्रुतिमाह॥ स इति॥ पुत्रादिशरीरस्य आत्मत्वासंभवे युक्तिं द
र्शयन्॥ पूर्वोक्तोधिकारिणः मकारणस्वस्य वैलक्षण्यं दर्शयति॥ प्रदीप्त इति॥ देहस्यात्मत्वे अनु

चार्वाकस्तु स वा एष पुरुषोन्नरसमय इत्यादिश्रुतेः॥ प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गम
दर्शनात् स्थूलोहं कृशोहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति॥ अपरश्चार्वाकः तेह प्रा
णाः प्रजापतिं पितरमेत्य ब्रूयुरुच्चुरित्यादिश्रुतेः॥ इंद्रियाणामभावे शरीरचलनाभावात् का
णोहं बधिरोहमित्याद्यनुभवाच्चेंद्रियाण्यात्मा इति वदति॥ अपरश्चार्वाकः अन्योंतरात्मा प्रा
णमय इत्यादिश्रुतेः॥ प्राणाभावे इंद्रियादिचलनायोगात् अहमशनायावानहं पिपासावानित्या
द्यनुभवाच्च प्राण आत्मेति वदति॥ ॥ नवं च प्रमाणयति॥ स्थूल इति॥ ततोप्युत्कृष्टः कोप्यधि
कारी श्रुतियुक्त्यनुभवैः इंद्रियाण्यात्मेति वदतीत्याह॥ अपरश्चार्वाकस्तु तेह प्राणा इति॥ ततो
प्युत्तमोधिकारी कश्चित् श्रुतिप्रमाणानुभवबलात् प्राण आत्मेत्याह॥ अपरश्चार्वाकः प्रा
णमय इति॥ ततो विशिष्टोधि ॥

वे०टी०
२३

कारी कश्चित्स्वमतानुकूलत्वादिबलात् मन एवात्मेत्याह॥ अन्यस्तु चार्वाक मनोमय आत्मा इ
ति॥ उक्तेभ्यः पंचेभ्यो विलक्षणः कश्चिद्विज्ञानवादी श्रुत्यादिभिर्विज्ञानमात्मेत्याह॥ बौद्धस्तु विज्ञा
नमय इति॥ उक्तेभ्योतिरिक्तौ प्राभाकरतार्किकौ स्वमनोपयोगिश्रुत्यादिबलात्॥ अज्ञानमात्मे
ति वदति इत्याह॥ प्राभाकरतार्किकौ आनंदमय इति॥ भट्टास्तु अज्ञानावच्छिन्नं चैतन्य

अन्यस्तु चार्वाकोऽन्योंतर आत्मा मनोमय इत्यादिश्रुतेः॥ मनसि सुप्ते प्राणादेरभावात् अहं
संकल्पवान् अहं विकल्पवान् इत्याद्यनुभवाच्च मन आत्मेति वदति॥ बौद्धस्त्वन्योंतर आत्मा
विज्ञानमय इत्यादिश्रुतेः कर्तुरभावे करणस्य प्राभवाभावात् अहं कर्ताहं भोक्तेत्याद्यनुभवाच्च
बुद्धिरात्मेति वदति॥ प्राभाकरतार्किकौ अन्योंतर आत्मानंदमय इत्यादिश्रुते बुद्ध्यादीना
मज्ञाने लयदर्शनात् अहमज्ञोऽहं ज्ञानीत्याद्यनुभवाच्च अज्ञानमात्मेति वदतः॥ भट्टास्तु
प्रज्ञानघन एवानंदमय इवानंदमय इत्यादिश्रुतेः॥ सुषुप्तौ प्रकाशाप्रकाशसद्भावात् अ
हं मां न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति॥ ॥ श्री॥ त्या
मात्मा इत्याह॥ प्रज्ञानघन एव आनंदमय इति॥ ॥श्री रामचंद्राय नमः॥ ॥

राम·
२३

बौद्धैकदेशी कदेशी कश्चित् श्रुत्यादिभिः शून्यमात्मेत्याह॥ अपरबौद्धस्तु असदेव शून्यमात्मा इति॥
अधुना पुत्रादिशून्यपर्यंतानामात्मत्वप्रतिपादकश्रुत्यादेराभासकत्वात् पूर्वमते पूर्वमतस्योत्तरोत्त
रमतबाधकत्वाच्च ज्ञप्तत्वजडत्वादिहेतुकदंबकैश्चानात्मत्वं प्रसिद्धमेवेति प्रतिपादयितुं प्रतिजा
नीते॥ एतेषामिति॥ पुत्राद्यात्मवादिनां मतिमंदाधिकारित्वात्तैः प्रतिपादितश्रुत्यादेरपि पूर्वपू
अपरो बौद्धो असदेवेदमग्र आसीदित्यादिश्रुतेः॥ सुषुप्तौ सर्वाभावात् अहं सुषुप्तौ नासमुत्थि
तस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति॥ एतेषां पुत्रादीनामनात्मत्वमुच्यते॥
एतैरतिप्राकृतादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासा
नामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टं पूर्वपू
र्वस्योत्तरोत्तरबाध्यत्वात्॥ पुत्रादिशून्यांतानामनात्मत्वं प्रसिद्धमेवेति प्रतिज्ञानमेवार्थं प्र
कटयति॥ एतैरिति॥ ननु पुत्रादिशून्यपर्यंतानामात्मत्वे सिद्धे कस्तर्हि अहंप्रत्ययविष
य आत्मेत्याशंक्य अस्थूलादिनिषेधवाक्यजातबोधितं॥ ॥

समस्तेत्तानमनेतंब्रह्मेत्यादिवाक्ये कोटीबोधितं पञ्चमत्वं ज्ञानानंतानंदाद्यं ब्रह्मसत देवाहमात्मेत्तनमिति प्रबलश्रुतियुक्त्यनुभवैः प्रतिपादयितुमाह॥ किंच प्रत्यगिति। अस्थूलादिप्रबलश्रुतिवाक्यैः पुत्रादिस्मृत्यपर्यंतात्मातिरिक्तात्मस्वरूपप्रतिपादनात्पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमित्यर्थं प्रबलविरुद्धत्वनवं प्रमाणयति॥ अहमिति॥ पुत्रादिस्थूलादीनां दोषत्वं दर्शयति॥ तन्नदिति॥ यतः पुत्रादी

किंच प्रत्यगस्थूलोचक्षुरप्राणोह्यमनाश्चकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधाद स्य पुत्रादिस्मृत्यपर्यंतोस्य जडस्य चैतन्यभासत्वेन घटादिवदनित्यत्वात्॥ अहंब्रह्मेति विद्वदनुभवप्राबल्याच्च॥ तत्र तत्स्मृतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिस्मृत्यपर्यंतमखिलमनात्मैव॥ अतस्तत्रत्रासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मतत्त्ववस्तु इति वेदांतविद्वदनुभवः॥ नो जडत्वादिहेतुभिरनात्मत्वं॥ अतः पुत्रादिभासः कनित्यशुद्धत्वादिस्वरूपमेवात्मवस्तु इत्यर्थः॥ नन्विदं विरुद्धं पुत्राद्यात्मस्वरूपप्रतिपादकश्रुतीनामप्रामाण्यं अस्थूलादिस्मृतीनां प्रामाण्यमिति॥ नहि वेदवाक्येषु केषांचिदप्रामाण्यं केषांचि

केषांचित्प्रामाण्यमिति प्रतिपादयितुं॥ एवं चेत्पुत्रादिश्रुतीनां प्रामाण्यं अस्थूलादिवाक्यानां अप्रमाण्यमिति वैपरीत्यं किं न स्यात्तच्चेद्वाक्यविशेषात्॥ किं केषांचिद्वेदवाक्यानामप्रामाण्यप्रतिपादनार्थमिदं प्रकारणमारब्धं मतः कथं निर्णय इति चेत्॥ अत्रोच्यते पुत्रादीश्रुतीनां सर्वथा एव प्रामाण्यं नास्तीति न निषिध्यते॥ किंतु अस्थूलादिप्रबलश्रुतिस्मृतिन्यायविरोधात्तात्पर्याभावात्॥ तेषां स्थूलारुंधतीन्यायेन पूर्वपूर्वनिराकरणद्वारा सूक्ष्मवस्तूपदेशे तात्पर्यमिति॥ तावदेव प्रतिपाद्यते॥ तथाहि॥ ध्रुवमरुंधतीं च दर्शयतीति विधिबन्धाद्गुरवधोरुंधतीदर्शने प्राप्ते परमसूक्ष्मरूपायाः अरुंधत्याः प्रथमकक्षायामेव प्रतिपत्तुमशक्यत्वात्॥ प्रथमं चंद्रज्योतिरूपारुंधतीत्युच्यते॥ ततश्च चंद्रभिन्नतारकारुंधतीत्युच्यते॥ ततः चंद्रतारकाभिन्नासप्ततारकात्मकारुंधतीत्युपतेत दनंतरं तत्तारकाचतुष्टयभिन्नातारकत्रितयात्मकेत्युच्यते॥ तन्मध्यतारकेत्युच्यते॥ तत्समीपवर्तिनी परमसूक्ष्मारुंधतीत्युच्यते॥ न चैतावता एतेषां पंचानां वाक्यानां परस्परविरुद्धार्थप्रतिपादकत्वेनाप्रामाण्यं शक्यं प्रतिपादयितुं किंतु प्रतिपन्नबुद्ध्यनुसारेण सोपानक्रमवत्पूर्वपूर्वनिराकरणद्वारा सूक्ष्मारुंधतीप्रतिपादने तात्पर्यात्तद्वदत्रापि अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनंदमय आत्मा ब्रह्मपुच्छं प्रतिपुच्छ ब्रह्मपर्यवसितानां पंचकोशवाक्यानामपि परस्पर॥

विरुद्धार्थप्रतिपादकत्वेपि प्रतिपत्तृबुद्ध्यनुसारेण सोपानक्रमवत्॥ पूर्वपूर्वनिराकरणद्वारा परमसूक्ष्म
पुच्छब्रह्मप्रतिपादनेतात्पर्यात्॥ तस्मात्सर्वेषां वेदवाक्यानां साक्षात्परंपरया वा अद्वितीयवस्तुप्रतिपा
दनेतात्पर्यात् प्रामाण्याविरोध इति संक्षेपः॥ विशेषाध्यारोपप्रकरणमुपसंहरति॥ एवमध्यारो
पः॥ आत्मवस्तुनि मिथ्याप्रपंचस्य सामान्यतो विशेषतश्च अध्यारोपप्रकारं सप्रपंचमभिधायेदा
नीं तदपवादप्रकारं आरभते॥ अपवादो नामेति॥ असंगोदासीने परमात्मवस्तुनि तद्विवर्त्तवस्तु
एवमध्यारोपः॥ अपवादो नाम रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्त्तस्यावस्तु
नो ज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं॥ वृत्ताऽज्ञानादिमिथ्याप्रपंचस्य विद्वस्तुमात्रावशेषतया
अवस्थानमेवापवाद इति वक्तुं प्रथमं लौकिकं दृष्टांतमाह॥ रज्जुस्वरूपापरित्यागेन सर्पा
कारेण ज्ञासमानस्य रज्जुविवर्त्तस्यापवादो नाशो नाम साधिष्ठानरज्जुमात्रतया अवस्थानव
द्विवर्त्तस्याज्ञानादिप्रपंचस्य नाशो नाम चिन्मात्रत्वेनावस्थानमित्यर्थः॥ अत्र यथा स्वरूपं
णावस्थितस्य वस्तुनोऽन्यथाभावोपि भवति॥ परिणामभावो विवर्त्तभावश्चेति॥ तत्र परि
णामभावो नाम वस्तुनः यथार्थतः स्वस्वरूपपरित्यागेन॥

स्वरूपांतरापत्तिः॥ यथा दुग्धमेव स्वरूपं परित्यज्य दध्याकारेण परिणमते॥ विवर्त्तभावस्तु वस्तु
नः स्वस्वरूपापरित्यागेनैव स्वरूपांतरेण मिथ्याप्रतिपत्तिः॥ यथा रज्जुस्वरूपापरित्यागेनैव सर्पा
कारेण मिथ्याप्रतिभासते॥ अत्र वेदांते ब्रह्मणि प्रपंचज्ञानस्य परिणामभावो नांगीक्रियते॥ दुग्धा
दिवद्ब्रह्मणो विकारित्वप्रसंगात् अनित्यत्वादिदोषापत्तेः॥ विवर्त्तभावांगीकारं तु नायं दोषः ब्रह्म
णि प्रपंचमानस्य मिथ्यात्वेन विकारित्वाभावात्॥ तदुक्तं॥ अधिष्ठानाविशेषो हि नाशः कल्पितः॥

तथाहि रातत्रोगायतनं चतुर्विधं सकलस्थूलस्थूलं शरीरजातं॥

वस्तुन इति॥ तस्माद्ब्रह्मविवर्त्तस्य प्रपंचस्य चिन्मात्रावस्थानमेवापवाद इति भावः॥ अस्मिन्न
र्थे श्रुत्यंतरसंवादं दर्शयति॥ तदुक्तं॥ सतत्वतोन्यथाप्रथा विकार इत्युदारितः॥ अतत्वतो
न्यथाप्रथा विवर्त्त इत्युदारितः॥ १॥ सामान्यतो दर्शितापवादप्रक्रियां विस्तरेण प्रतिपादयि
तुं प्रतिजानीते तथाहि स्थूलसूक्ष्मकारणप्रपंचानामुत्पत्तिवैपरीत्येन तत्कारणरूपेणावस्था
नमेव इत्याह॥ एतदिति॥ एतत्स्थूलशरीरं स्थाप्रपंचब्रह्मांडसहितं स्वकारणभूतपंचीकृतेषु

पंचमहाभूतेषु ज्ञानं तत्तन्मात्रका

ऽवतिष्ठते॥ तानि पंचपंचीकृतानि शब्दादिसहकृतानि सतद्गुणावयवात्मकलिंगशरीराणि च स्वकारणेषु
अपंचीकृतभूतेषु लीनानि भवंति॥ तान्यपंचीकृतानि भूतानि सत्त्वादिगुणसहितानि स्वकारणज्ञानोपहितचैत
न्ये लीनानि भवंति॥ तच्चाज्ञानं तदुपहितचैतन्यं सर्वज्ञत्वादिविशिष्टचैतन्यं च स्वाधारभूतानुपहितचैतन्ये जी
भोग्यरूपान्नपानादिकम् एतदायतनभूतभूरादिचतुर्दशभुवनानि॥ एतदाश्रयब्रह्मांडं च एतत्सर्वमे
तेषां कारणरूपं पंचीकृतभूतमात्रं भवति॥ एतानि शब्दादिविषयसहितानि पंचीकृतभूतजातानि
सूक्ष्मशरीरजातं च॥ एतत्सर्वमेतेषां कारणरूपापंचीकृतभूतमात्रं भवति॥ एतानि सत्त्वादिगुणस
हितान्यपंचीकृतानि उत्पत्त्युत्क्रमेण एतत्कारणभूताज्ञानोज्ञानोपहितचैतन्यमात्रं भवति॥ एतद
ज्ञानमवज्ञानमवज्ञानोपहितं चैतन्यमीश्वरादीक एतदाधारभूतानुपहितचैतन्यरूपं तुरीयं
ब्रह्ममात्रं भवति॥ आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति॥ ॥१॥ राम॰

ने भवतीति॥ चैतन्यमेवावशिष्यत इत्यर्थः॥ फलितमाह॥ आभ्यामिति स्पष्टार्थः॥ श्री ॥ २६

तत्त्वंपदार्थशोधनप्रकारं प्रतिजानीते॥ तथाहि अज्ञानादीति॥ अज्ञानं तदवच्छिन्नेश्वरचैतन्यं
एतत्त्रयं तप्तायःपिंडवदन्योन्यतादात्म्याध्यासेनैकत्वेन प्रतीयमानं सत्तत्पदवाच्यार्थो भवतीत्यर्थः॥
तत्पदलक्ष्यार्थमाह॥ एतदिति॥ अज्ञानावच्छिन्नेश्वरचैतन्यस्याधारभूतं यदनुपहितं चै
तन्यं तत्ताभ्यां विविक्तं सदविवक्षया तत्पदलक्ष्यार्थो भवतीत्यर्थः॥ त्वंपदवाच्यार्थमा

द्वि तथाहि अज्ञानादिसमष्टिसर्वज्ञत्वादिविशिष्टं चैतन्यं एतदनुपहितं चैतन्यं एतत्त्रयं तप्तायः
पिंडवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति॥ एतदुपाध्युपहिताधारमनुपहितं
चैतन्यं तत्पदलक्ष्यार्थो भवति॥ अज्ञानादिव्यष्टिरेतदुपहितज्ञानत्वादिविशिष्टं चैतन्यं
एतदनुपहितं चैतन्यत्रयं तप्तायःपिंडवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति॥१॥

ह॥ अज्ञानादीति॥ व्यष्टिभूतमज्ञानं यदंतःकरणं तदवच्छिन्नं जीवचैतन्यं तदनुपहितं
चैतन्यं चैतन्यं चेत्येतत्त्रयं तप्तायःपिंडवत्परस्परस्य तादात्म्याध्यासेनाभेदविवक्षया
त्वंपदवाच्यार्थो भवतीत्यर्थः॥ त्वंपदलक्ष्यार्थमाह॥ ॥

एतदितिः॥ अंतःकरणोपहितचैतन्यत्रयस्याधारभूतं यदनुपहितप्रत्यगानंदतुरीयचैतन्यं त्वंपदल
क्ष्यार्थो भवतीत्यर्थः॥ पदार्थमभिधाय वाक्यार्थमभिधाय वाक्यार्थमाह॥ अथ महावाक्यार्थ इति॥ त
नुजीवेश्वरयोः किंचिज्ञत्वसर्वज्ञत्वादिविशिष्टयोरत्यंतविलक्षणयोस्तत्त्वमस्यादिमस्यादिमहावा
क्यानि परस्परविरुद्धार्थप्रतिपादकानि कथमखंडैकरसं ब्रह्म प्रतिपादयंतीत्याशंक्यासाक्ष

एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानंदतुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति॥
अथ महावाक्यार्थो वर्ण्यते॥ इदं तत्त्वमसि वाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति॥ संबं
धत्रयं नाम॥ पदयोः सामानाधिकरण्यं॥ पदार्थयोः विशेषणविशेष्यता॥ प्रत्यगात्मपदार्थ
योः लक्ष्यलक्षणभावश्चेति॥ ॥ दैकप्रतिपदानांवेपि लक्षणयासंबंधत्रयेण च अखंडार्थं प्रति
पादयंतीत्याह॥ इदं तत्त्वमसीति॥ स्पष्टार्थः॥ संबंधत्रयस्वरूपमाह॥ संबंधत्रयं नाम इति स्प
ष्टार्थः॥ पदार्थप्रत्यगात्मनां संबंधत्रयसमावेशं संमतिमाह॥ तदुक्तं॥ सामानाधिकरण्यं च वि
शेषणविशेष्यता॥ लक्ष्यलक्षणसंबंधः पदार्थः प्रत्यगात्मनामिति॥ ॥ राम॰ २७

पादयोः सामानाधिकरण्यं उदाहरणं निष्टंकृत्वा प्रदर्शयति॥ सामानाधिकरण्यमिति॥ भिन्नप्रवृ
त्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं॥ तत्र सोयं देवदत्त इति वाक्ये स इति त
त्पदस्य तत्कालतद्देशविशिष्टं प्रवृत्तिनिमित्तं। एतत्कालैतद्देशविशिष्टमयं शब्दस्य प्रवृत्तिनिमित्तं॥
तथा च भिन्नप्रवृत्तिनिमित्तयोः सोयं शब्दयोरेकस्मिन् देवदत्तपिंडे तात्पर्यसंबंधः सामानाधिकर
सामानाधिकरण्यं संबंधस्तावत् यथा सोयं देवदत्त इत्यस्मिन् वाक्ये तत्कालविशिष्टदेवदत्तवाच
कशब्दस्य एतत्कालविशिष्टदेवदत्तवाचकायं शब्दस्य च एकस्मिन् पिंडे तात्पर्यसंबंधः॥ तथा च
तत्त्वमसीति वाक्ये परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्य अपरोक्षत्वादिविशिष्टचैतन्यवा
चकत्वंपदस्य च एकस्मिन् चैतन्ये तात्पर्यसंबंधः॥ ण्यमित्यर्थः॥ उक्तमर्थं दृष्टांते योजयति॥ त
था च तत्त्वमसीति॥ तथा तत्त्वमसीति वाक्येपि परोक्षत्वसर्वज्ञत्वादिविशिष्टं तत्पदं प्रवृत्तिनिमित्तं॥
अपरोक्षत्वं किंचिज्ञत्वादिवैशिष्ट्यं त्वंपदप्रवृत्तिनिमित्तं॥ तथा च भिन्नप्रवृत्तिनिमित्तयोस्तत्त्वंपद
योरेकस्मिन् चैतन्ये तात्पर्यसंबंधः॥ सामानाधिकरण्यमित्यर्थः॥

विशेषणविशेष्यस्वरूपमाह॥ विशेषण इति॥ व्यावर्तकं विशेषणं व्यावर्त्यं विशेष्यं। तथा सोयं देव
दत्त इति वाक्य एव अयंशब्दवाच्यो योसावेतत्कालैतद्देशसंबंधविशिष्टो देवदत्तपिंडः॥ अयं सद्
तितच्छब्दवाच्यात्तत्कालतद्देशविशिष्टदेवदत्तपिंडाद्भिन्नो नेति यदा प्रतीयते तच्छब्दार्थस्य॥ अ
यंशब्दवाच्यार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं॥ अयंशब्दार्थस्य व्यावर्त्यत्वाद्वि
शेष्यत्वं॥ यदा च स इति तच्छब्दवाच्यस्तत्कालतद्देशविशिष्टो देवदत्तपिंडः॥ न अयमिति इदं
विशेषणविशेष्यभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्य अयं
शब्दार्थैतत्कालविशिष्टदेवदत्तस्य च अन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः
शब्दवाच्यादेतत्कालैतद्देशसंबंधविशिष्टादस्मात्॥ देवदत्तपिंडान्न भिद्यते इति यदा प्र
तीयते॥ तदा अयंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं॥ तच्छब्दा
र्थस्य व्यावर्त्यत्वाद्विशेष्यत्वं तथा च अयमेव सः॥ स एवायमित्यन्योन्यभेदव्यावर्तकत
तायं शब्दार्थयोः परस्परं विशेषणविशेष्यभाव इत्यर्थः॥ ॥

उक्तं विशेषणविशेष्यभावं प्रकृते योजयति॥ तथात्रापीति॥ इष्टोहात्रपि तत्वमसी॥ वाक्ये
पि त्वंपदवाक्येपि त्वंपदवाच्यं यदपरोक्षत्वंकिंचिज्ज्ञत्वादिविशिष्टचैतन्यः तत्पदवाच्यात्सर्वज्ञत्वा
दिविशिष्टचैतन्यान्न भिद्यते इति॥ यदा प्रतीयते तदा तच्छब्दार्थस्य त्वंपदार्थनिष्ठभेदव्यावर्तकतया
विशेषणत्वं॥ यदा च तत्पदवाच्यं परसार्वज्ञत्वादिविशिष्टं चैतन्यं त्वंपदवाच्यात्॥ किंचिज्ज्ञत्वा
तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यत्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य
चान्योन्यभेदव्यावर्तकतया विशेषणविशेषणभावः॥ लक्ष्यलक्षणभावसंबंधस्तु यथा तत्र
सोयंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टपरित्यागेनाविरुद्धदेवदत्ते
न सह लक्ष्यलक्षणभावः॥ दिविशिष्टचैतन्यान्न भिद्यत इति यदा प्रतीयते तदा त्वंपदार्थ
स्य तत्पदार्थनिष्ठभेदव्यावर्तकत्वेन विशेषणत्वं तत्पदार्थस्य विशेष्यत्वं॥ तथा च त्वं तदसि त
त्वमसीति तत्त्वंपदार्थयोः परस्परभेदव्यावर्तकत्वेन परस्परं विशेषणविशेष्यभाव इत्यर्थः।
क्रमप्राप्तं लक्ष्यलक्षणभावसंबंधं निरूपयितुमाह॥ लक्ष्यलक्षणमिति॥

वे०टी०
२९

असाधारणधर्मप्रतिपादकं वाक्यं लक्षणत्वं ॥ तत्प्रतिपाद्यमविशिष्टं वस्तु लक्ष्यं । तथा च सोयं देवदत्त इत्य
स्मिन्वाक्ये सोयंशब्दार्थयोस्तदर्थयोर्वा विरुद्धं तत्कालतद्देशवैशिष्ट्य एतत्काल एतद्देशविशिष्ट
त्वपरिहारेणाविरुद्धदेवदत्तत्वविशिष्टदेवदत्तपिंडे तत्सहदेवदत्तवाचकशब्दस्य लक्षणाभावसंबंध इ
त्यर्थः ॥ उक्तमर्थं दार्ष्टांतिके योजयति ॥ तथात्रापीति ॥ इहात्रापि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धप
रोक्षत्वादिविशिष्टत्वपरित्यागेन तत्त्वंपदांशां लक्ष्याविरुद्धचैतन्येन सह तत्त्वंपदयोर्लक्ष्यणभावसं

तथात्रापि वाक्ये तत्त्वंपदार्थयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वादिविशिष्टत्वपरित्यागे न सह लक्ष्य
लक्षणभाव ॥

बंध इत्यर्थः ॥ अत्र तत्त्वंपदयोस्तदर्थयोश्च त्यक्तविरुद्धांशयोर्लक्ष्यत्वं अखंडचै
तन्यस्य लक्ष्यत्वमिति भावः ॥ ननु तत्त्वमस्यादिवाक्यानां भागलक्षणयैव चैतन्यबोधकत्वं प्रतिप
द्यते ॥ तत्त्वमस्यादिवाक्ये लक्षणा भागलक्षणेत्यादि विरोधमाशंक्य संज्ञाभेदो न वस्तुभेद इय राम.
मेव भागलक्षणेत्युच्यते इत्यर्थः ॥ ननु यथा नीलोत्पलमिति वाक्ये नीलत्वविशिष्टनीलगुणस्य २९
उत्पलत्व

विशिष्टस्योत्पलद्रव्यस्य च सम्यतिरिक्तशुक्लादिगुणान्तरघटादिद्रव्यान्तरव्यावर्तकत्वे विशेषणविशेष्य
भावनिरूपितं तद्भिन्नसंसर्गस्य नीलगुणविशिष्टस्य वा वाक्यार्थत्वं तथेहापि तत्त्वमस्यादिवाक्ये तत्प
दार्थस्य परोक्षत्वादिविशिष्टेश्वरचैतन्यस्य त्वंपदार्थस्यापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्य
भेदव्यावर्तकतया विशेषणविशेष्यभूतसर्वज्ञत्वं किंचिज्ज्ञत्वोभयनिरूपितसंसर्गो वा सर्व

स्यमेव भागलक्षणेत्युच्यते ॥ अस्मिन्वाक्ये नील
उत्पलमिति वाक्यवत् वाक्यार्थो न संगच्छते ॥ ७ ॥

ज्ञत्वादिविशिष्टस्य किंचित् ॥ ज्ञत्वादिविशिष्टेन सहैक्यं वाक्यार्थो भवतीत्याशंक्य दृष्टांतदार्ष्टांतिक
योर्वैषम्यान्नैवमित्याह ॥ अस्मिन्नित्यादिना ॥ अस्मिन्तत्त्वमसीति वाक्ये नीलोत्पलवत् संसर्गो वा वि
शिष्टो वा वाक्यार्थो न संगच्छत इत्यर्थः ॥ नीलोत्पलमिति वाक्य संसर्गवाक्यार्थो न संगच्छते ॥ अ
स्मिन्तत्त्वविशिष्टार्थप्रतिपादकत्वकल्पने विरोधाभावं दर्शयति ॥ तत्र तु नीलगुणस्येति ॥ ॥

वे॰सा॰ नीलोत्पलपदार्थयोर्गुणगुणिनोर्विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्य
३० वाक्यार्थत्वांगीकारे प्रमाणांतरविरोधाभावात्तद्वाक्यार्थः संगच्छते॥ नीलोत्पलपदार्थयोर्गुणगुणि
नोर्विशेषणविशेष्यभावसंसर्गस्य नीलगुणविशिष्टोत्पलैक्यस्य वा वाक्यार्थत्वांगीकारे प्र
त्यक्षादिप्रमाणांतरविरोधाभावात्तत्र तथा संगच्छत इति भावः॥ तत्त्वमसीतिवाक्ये तु तत्त्वंपदा

तत्र तु नीलपदार्थनीलगुणस्य उत्पलद्रव्यस्य च शौक्ल्यपदादिभेदव्यावर्तकतयान्योन्यवि
शेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वाक्यार्थत्वांगीका
रे प्रमाणांतरविरोधाभावात्तद्वाक्यार्थः संगच्छते॥ अत्र तु तदर्थपरोक्षत्वादिविशिष्टचै
तन्यस्य
र्थयोः किंचिज्ज्ञत्वादिविशिष्टजीवचैतन्यस्य वा सर्वज्ञत्वादिविशिष्टेश्वरचै
तन्यस्य वा तदुभयविशिष्टचैतन्यैकस्य वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणांतरविरोधा राम॰
त् पूर्ववत् वैषम्यं दर्शयति॥ अत्र तु तदर्थ इति॥ तदुक्तं॥ संसर्गो वा विशिष्टो वा वाक्यार्थो ३०
नात्र संमतः॥ अखंडैकरसत्वेन वाक्यार्थो विदुषां मत इति॥

ननु तत्त्वमस्यादिवाक्यमखंडार्थकं यदि बोधयति जहल्लक्षणया वा किमजहल्लक्षणया वा आहोस्विज्ज
हदजहल्लक्षणया इति त्रिविधा विकल्पाः॥ आद्ये दूषणमाह॥ अत्र तत्त्वमसीति वाक्ये जहल्लक्षणा न संगच्छ
त इत्यन्वयः॥ तदेव दर्शयितुं जहल्लक्षणाया उदाहरणं तावदाह॥ गंगायामिति॥ मानांतरविरोधे तु

त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य वान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभाव
संसर्गस्य अन्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य च वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाण
विरोधात् वाक्यार्थो न संगच्छते॥ अत्र तु गंगायां घोषः प्रतिवसतीति वाक्यवत् जहल्लक्षणा
पि न संगच्छति॥
मुख्यार्थस्य परिग्रहे॥ मुख्यार्थेन विनाभूते प्रवृत्तिर्लक्षणेष्यते॥ इति व
चनात् गंगायां घोषवासनासंभावात्॥ गंगायां घोष इति वाक्यस्य मुख्यार्थविरोधे सति मुख्यार्थ
परित्यज्य जहल्लक्षणया स्वार्थसंबंधिनि तीरे घोषावस्थानप्रतिपादनात्तत्र जहल्लक्षणाङ्गी
कारो युज्यत इत्याह॥ तत्रेति॥ ॥ ॥

आधाराधेयभावलक्षणं सर्वथा परित्यजेदित्यर्थः॥ तत्त्वमसीतिवाक्ये परोक्षापरोक्षचैतन्यैकत्वलक्ष
णस्य वाक्यार्थस्य भागमात्रे विरोधात्॥ तुशब्दः पूर्वस्माद्वैषम्यं द्योतयति॥ तत्त्वमसीतिवाक्ये परो
क्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रविरोधात्॥ तुशब्दः पूर्वस्माद्वैषम्यं द्योत
यति॥ तत्त्वमसीतिवाक्ये परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य विरोधाभावात्॥ परो

तत्र तु गंगाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वात्॥ वाक्यार्थ
मशेषतः परित्यज्य तत्संबंधितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा संगच्छते॥ अत्र तु परो
क्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधात् भागांतरमपि परित्यज्यान्य
लक्षणया॥ क्षत्वापरोक्षत्वप्रतिपादकत्वांशो विरोधात् चैतन्यैकत्वे विरोधाभावात्॥ गंगायां
घोषादिवाक्यवत्सर्वात्मना मुख्यार्थपरित्यागासंभवात् जहल्लक्षणा न संगच्छते॥ तत्र हे
तुमाह॥ विरोधयोः परोक्षत्वापरोक्षत्वयोरेकत्वयोरेकत्वासंभवे न तत्परित्यागेपि चैतन्य
भागस्यैकत्वे विरोधाभावात् तत्परित्यागो न युज्यत इत्यर्थः॥

ननु यथा गंगायां घोषः प्रतिवसतीतिवाक्ये गंगापदं प्रवाहलक्षणं॥ स्वार्थं परित्यज्य स्वसंबंधिना
तीरपदार्थं लक्षयति॥ तथा तत्त्वमसीवाक्ये तत्पदं स्वार्थं परोक्षत्वविशिष्टं परित्यज्य जीवचैतन्यं
लक्षयतु॥ एवं त्वंपदमपि स्वार्थं किंचिज्ज्ञत्वादिविशिष्टं परित्यज्य ईश्वरचैतन्यं लक्षयतु॥ त
स्मात्कथं जहल्लक्षणैव न भवतीत्याशंक्य निराकरोति॥ न च गंगापदमिति स्पष्टार्थः॥ निराकरणप्र
अयुक्तत्वाज्जहल्लक्षणा न संगच्छते॥ न च गंगापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति त
था तत्पदं त्वंपदं वा स्वार्थपरित्यागेन त्वंपदार्थं तत्पदार्थं वा लक्षयतु अतः कुतो जहल्लक्षणा न
संगच्छत इति वाच्यं॥ तत्र तीरपदाश्रवणेन तदर्थप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्व
पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्॥
कारमेवाह॥ तत्रेत्यादिना॥ श्रुतवाक्यमुख्यार्थविरोधे मुख्यार्थसंबंधिन्यश्रुतप
दार्थे लक्षणेति सर्वजनप्रसिद्धं॥ न च गंगायां घोष इत्यश्रुतवाक्यार्थस्य गंगाघोषयोराधारा
धेयभावसंबंधस्य विरोधे सति श्रूयमाणं गंगापदं स्वार्थपरित्यागेन तीरपदार्थं लक्षयतीति॥

वे०टी०
३२

युक्तं गंगापदार्थस्य तीरपदार्थप्रतीतिसापेक्षत्वात्॥ इह श्रूयमाणं तत्त्वंपदयोर्मुख्यतयैव तदर्थसर्व
तदर्थसर्वज्ञत्वकिंचिज्ज्ञत्वादिविशिष्टप्रतीतौ सत्यामपि लक्षणया तत्पदेन त्वंपदार्थप्रतीत्यपेक्षा
भावात् त्वंपदेन तत्पदार्थप्रतीत्यपेक्षाभावाच्च मुख्यार्थे संभवति लक्षणया अन्याय्यत्वात् जहल्लक्ष
णापि न संभवति॥ द्वितीयं परस्य दुष्यति॥ अत्र शोणो धावतीति॥ अत्र तत्त्वमसीति वाक्ये अजहल्लक्षणा

अत्र शोणो धावतीति वाक्यवदजहल्लक्षणापि न संभवति॥ अत्र शोणगुणगमनलक्षणस्य वा
क्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसंभवात् अ
जहल्लक्षणा संभवति॥ अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्ध
त्वात्तदपरित्यागेन तत्संबंधिनो यस्य कस्यचिदर्थलक्षितत्वेपि तद्विरोधापरिहारसंभावात्॥॥

पि न संभवतीत्यन्वयः॥ कुत इत्यत आह॥ अत्र शोणगुण इति॥ तत्र शोणो धावतीत्यादिवाक्ये राम:
शोणगुणस्य गमनासंभवेन वाक्यस्य मुख्यार्थविरोधे सति श्रूयमाणं शोणपदं स्वार्थपरित्या ३२
गेन स्वाश्रयमश्वादिकं लक्षयतीति युक्तं॥

ऽप्रदांतरेणेति॥ तत्पदेन तु तत्त्वमस्यादिवाक्ये तत्त्वंपदार्थस्य परोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षण
स्य मुख्यवाक्यार्थस्य विरुद्धत्वात्॥ परोक्षत्वापरित्यागेन तद्विशिष्टचैतन्यलक्षणार्थस्य लक्षितत्वे
पि तद्विरोधपरिहाराभावात् अजहल्लक्षणा न संभवतीत्यर्थः॥ ननु तत्पदं स्वार्थविरोधपरोक्ष
त्वादिधर्मपरित्यज्य अविरुद्धचैतन्यांशापरित्यागेन त्वंपदार्थं किंचिज्ज्ञत्वादिविशिष्टं जीवचै

अजहल्लक्षणापि न संभवत्येव॥ न च तत्पदं त्वंपदं वा स्वार्थविरुद्धांशापरित्यागेन अंशांतर
सहितं त्वंपदार्थं तत्पदार्थं वा लक्षयतु अतः कथं प्रकारांतरेण भागलक्षणांगीकरणमि
ति वाच्यं॥ एकेन पदेन स्वार्थांतरपदार्थांतरोभयलक्षणाया असंभवात्॥॥

तन्यं लक्षयतु॥ त्वंपदार्थं स्वार्थविरोधापरोक्षत्वादिधर्मं परित्यज्य अविरुद्धचैतन्यांशापरि
त्यागेन तत्पदार्थं सर्वज्ञत्वादिविशिष्टमीश्वरचैतन्यं लक्षयतु॥ किं विना भागलक्षणांगीकारे
णेत्याशंक्य निराकरोति॥ न च तत्पदमिति॥ एकेन पदेन तत्पदेन त्वंपदेन वा स्वार्थांशपरि
त्यागे पदार्थांतरोभयलक्षणाया असंभवादित्यर्थः॥ अजहल्लक्षणासंभवे हेत्वंतरमाह।

वे०टी०
३३

पदांतरेणेति ॥ तत्पदेन त्वंपदेन वा तदर्थप्रतीतो लक्षणया पुनरन्यतरस्मादन्यतरप्रतीत्यपेक्षाभावा
दित्यर्थः ॥ अतः परिशेषात्तृतीयपक्ष एव स्वीकर्तव्य इत्युपसंहरति ॥ तस्मात्सोयं देवदत्त इति ॥ यस्मा
त्तत्त्वमस्यादिवाक्ये जहल्लक्षणाजहल्लक्षणयोरसंभावस्तस्माज्जहदजहल्लक्षणयोरसंभवस्तस्मा
ज्जहदजहल्लक्षणया विरुद्धांशं परित्यज्य अविरुद्धमखंडं चैतन्यमात्रं लक्षयति ॥ योजनात्र कष्टं [?]

पदांतरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च ॥ तस्मात्सोयं देवदत्त इति वाक्ये
तदर्थो वा तत्कालएतत्कालविशिष्टदेवदत्तलक्षणवाक्यार्थस्यांशे विरोधाद्विरुद्धतत्एतत्काल
विशिष्टांशं परित्यज्याविरुद्धदेवदत्तांशमात्रं लक्षयति ॥ ॥ तमाह ॥ यथेति ॥ यथा सोयं देवदत्त इ
ति वाक्ये प्रागुक्तजहल्लक्षणाजहल्लक्षणयोरसंभवेन तदर्थस्य तत्कालतद्देशविशिष्टस्यै
तत्कालैतद्देशविशिष्टस्य देवदत्तलक्षणवाक्यार्थस्य एकस्मिन्नंशे तत्कालएतत्कालवि
शिष्टभागे विरोधदर्शनात्तत्परित्यागेनाविरुद्धदेवदत्तमात्रं लक्षयतीत्यर्थः ॥ मानां
तरविरोध इत्युक्तन्यायेनेत्यर्थः ॥ उक्तमर्थं दार्ष्टांतिके योजयति ॥ ॥

राम०
३३

तथा तत्त्वमसीति वाक्यमिति ॥ तथा तत्त्वमस्यादिवाक्यस्यापि परोक्षत्वादिविशिष्टत्वांशं परित्यज्य अविरु
द्धमखंडं चैतन्यमात्रं लक्षयतीति ॥ तथा तत्त्वमस्यादिवाक्यस्यापि चैतन्यैकत्वलक्षणमुख्यार्थप्रतिपाद
कत्वासंभवाज्जहदजहल्लक्षणयाविरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टांशपरित्यागेनाविरुद्धं परोक्षत्वा
परोक्षत्वादिविशिष्टांशापरित्यागेनाविरुद्धाखंडचैतन्यमात्रप्रतिपादकत्वं तस्येत्यर्थः ॥ अखंडचैत
तथा तत्त्वमसीति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यां
शे विरोधाद्विरुद्धं परोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्य अविरुद्धमखंडचैतन्यमात्रं ल
क्षयतीति ॥ अथाधुना अहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते ॥ ॥
न्यप्रतिपादकस्यैतत्त्व
मसीति वाक्यस्यार्थं सप्रपंचमभिधायेदानीं यजुर्वेदानुभववाक्यार्थो वर्ण्यत इत्याह ॥ अथाधु
नेति ॥ गुरुमुखात्तत्त्वकत्वस्य तत्त्वमस्यादिवाक्यश्रवणाद्देहाद्यहंकारजडपदार्थसकलस्वरूपविल
क्षणप्रत्यगात्मनः शुद्धं ब्रह्म परमात्मना सह ऐकत्वबोधानंतरं कश्चिदधिकारी लब्धावसरः स वेदा
धिविनिर्मुक्तं सच्चिदानंदैकरसमनुभवन् निजित्तासुराचार्योपदिष्टअहं ब्रह्मास्मीति वाक्यार्थम
नुस्मरन् स्वात्मानंदमनुभवतीत्यर्थः ॥ ॥

वे०टी०
३४

तत्प्रकारमेवाह॥ एवमित्यादिना॥ एवं संक्षेपेण प्रमाणकारेण अधिकारिणश्चित्तवृत्तिरुदेतीति
संबंधः॥ कदेत्यपेक्षायामाह॥ आचार्येणेति॥ आचार्येण विषये सर्वेनिष्कलचैतन्ये शशशृंगा-
पमनोविद्याअहंकारादिशरीरांतमिथ्यापदार्थमध्यारोप्य तदपवादपुरःसरं तत्त्वंपदार्थौ
शोधयित्वा तत्त्वमसीति वाक्ये नजहदजहल्लक्षणया विरुद्धांशपरित्यागेन अखंडार्थचैत-
न्ये ज्ञाते सतीत्यर्थः॥ किंचिद्विषयिणी चित्तवृत्तिरुदेतीत्यसत्वशंकां निवारयति॥ अहंप्रत्यगा

एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखंडार्थेऽवबोधि-
तेऽधिकारिणि अहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयं ब्रह्मास्मीत्यखंडा-
काराकारिता चित्तवृत्तिरुदेति॥

त्मा परंब्रह्मास्मीत्यन्वयः॥ ब्रह्मानित्यत्वशंकां निराक-
रोति॥ नित्येति॥ शुद्धपदेन सर्वोपाधिराहित्यं सत्यमित्यविनाशिस्वभावत्वं परमानंदेन
वैषयिकमनुष्यानंदादिचतुर्मुखब्रह्मानंदपर्यंतानां कर्मजन्यत्वेन सातिशयत्वेन क्षयिष्णु-
त्वेन च तुच्छत्वात्तेभ्यो विलक्षणं निरतिशयानंदस्वरूपत्वं प्रतिपाद्यते॥ अनंतपदेन घटा-

राम०
३४

दिवत्परिच्छेदराहित्येन देशतः कालतो वस्तुतश्चापरिच्छिन्नत्वं बोध्यते॥ अद्वयमिति नानात्वनिषेधे-
न एकत्वं बोध्यत इत्यर्थः॥ ननु यथा दीपप्रभा आदित्यमंडलं न व्याप्नोति न च प्रयोजनमस्ति
तथा नित्यशुद्धस्वप्रकाशमात्मानं जडा चित्तवृत्तिः कथं विषयीकृत्योदेति किं प्रयोजनं चेत्त्वा-
शंक्याह॥ सा त्विति वृत्तिरिति॥ अज्ञानविशिष्टप्रत्यगभिन्नपरब्रह्मविषयिणीः सा च चैतन्य-
प्रतिबिंबसंवलिता सति चैतन्यमज्ञानेनैवविशिष्टं प्रवर्तयति॥ तस्याश्चैतन्यावरकाज्ञानिनि-

सा चित्तवृत्तिः चित्प्रतिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञा-
नमेव बाधते॥ तदा पटकारणं तंतुदाहे पटदाहवत् अखिलकारणेऽज्ञाने बाधिते सति
तत्कार्यस्याखिलस्य बाधितत्वात्॥

वृत्तिरेव प्रयोजनमित्यर्थः॥ नन्वधिकारिणस्तत्त्व-
मस्यादिवाक्यश्रवणोत्पन्नाखंडचैतन्यवृत्त्या तदाश्रिताज्ञाने निवारितेपि तत्कार्यस्य स-
कलचराचरस्य प्रत्यक्षतया जायमानत्वात्॥ कथमद्वैतसिद्धिरित्याशंक्य कारणाज्ञानना-
शे तत्कार्यसकलप्रपंचनाशे द्वैतसिद्धिरित्येतस्य दृष्टांतमाह॥ तदा पटकारणेति स्पष्टार्थः॥

ननु अज्ञाननाशे न तत्कार्यप्रपंचस्य नाशोस्तु तथाप्यखंडाकारवृत्तेरनिवृत्तेर्द्वैतहानिरित्याशंक्याह॥त
दंतर्भूतेति॥अखंडाकारवृत्तेरपि अज्ञानतत्कार्यांतर्भूतत्वात्तन्निवृत्त्या तन्निवृत्तेः न द्वैतहानिरि
त्यर्थः॥ननु तथाप्यखंडाकारवृत्तेरपि अज्ञानतत्कार्यांतर्भूतत्वात्तन्निवृत्त्या तन्निवृत्तेः न द्वैत
हानिरित्यर्थः॥ननु तथाप्यखंडाकारवृत्तिप्रतिबिंबितचैतन्याभासत्वात्।कथमद्वैतसिद्धिरित्या

तदंतर्भूताखंडाकाराकारिताचित्तवृत्तिरपि बाधिता भवति॥तत्प्रतिबिंबितं चैतन्यमपि यथा
दीपप्रभादित्यप्रभासमाना समर्था सति तथा पाभिभूता भवति॥तथा स्वयंप्रकाशमानप्र
त्यगभिन्नपरब्रह्मावभासनानर्हतया पातेनाभिभूतं सत्स्वोपाधिभूताखंडवृत्ते बाधितत्वात्॥

शंक्याह॥तत्प्रतिबिंबितमिति॥वृत्तिनिवृत्तौ तत्प्रतिबिंबितचैतन्यस्य बिंबावभासनासमर्थ
त्वाद्वृत्त्युपाधिबाधेन तत्प्रतिबिंबितमपि चैतन्यमात्रतयावशिष्यते॥दर्पणोपाधिविगमे तत्प्र
तिबिंबितमुखाभासस्य बिंबभूतमुखमात्रतावदेषवदित्यर्थः॥अयं भावः॥शोधिततत्त्वंप
दार्थस्याधिकारिणस्तदाबिंदंभितगुरुशास्त्रादिभ्यः॥

तत्त्वमसीत्युपदेशेन अहं नित्यशुद्धबुद्धमुक्तसत्यपरमानंदाद्वयाखंडब्रह्मास्मीति चित्तवृत्तिरु
दयमासादयति॥तदानीमेव तस्याश्चाखंडचैतन्यबलेन तत्वपरिपीडिताज्ञाननाशो भवति॥तदा
नीं तत्कार्यस्य सर्वस्य नाशाद्वह्निव्यक्तिरपि स्वयमेकतकरजोवदारुमथनजनिताग्निवद्दुरस्थदुष्ट
जलशांत्यर्पितनप्रजनश्च भवति॥तदानीं तदाभासोपि स्वोपाधिभूततद्वृत्तिनाशात्स्वप्रकाशात्म
वभासनासमर्थतया दर्पणविगमे तदुपाधिकस्यस्याधिष्ठानमुखमात्रत्ववदधिष्ठानमात्रो भव
दर्पणाभावे मुखप्रतिबिंबस्य मुखमात्रत्ववत्प्रत्यगभिन्नपरब्रह्ममात्रं भवति॥

ति इति वेदांतसिद्धांतरहस्यमिति॥अत्र तस्यानुभवः॥लोकाभ्रमंति परमे मतिमोहजालाः स्व
प्नेंद्रजालमरुनीरसमा विचित्राः अस्त्वानकाल इह नस्सुरलं विशुद्धप्रत्यक्सुखाब्धिपरमामत
चित्तवृत्तौ॥१॥मत्तः परं तत्खलु विश्वमयापि भाति मध्ये च पूर्वमपरं नरशृंगतुल्यं॥मायोच्छास
स्तगुरुवाक्यसमुच्चबोधभानुप्रभाविलसति क्वागतं न जाने॥२॥निरतिशयसुखाब्धेः स्व
प्रकाशे परेस्मिन्कथमिदमविवेकादुच्छितं स्तक फणीवः॥ क्व च गतमधुना

तद्देशिकोवाश्रुतिर्वापरमविमलबोधेस्थितेहंनजाते॥३॥ तदेतत्सर्वंमनसिनिधायोपसंहरतिप्र
त्यगभिन्नेतिनतुमनसैवानुद्रष्टव्यंमनसैवेदमाप्तव्यं। इत्यतेतत्र्ययाबुध्यासूक्ष्मयासूक्ष्मद
र्शिभिः॥ बुध्यालोकनसाध्येस्मिन्नवस्त्वन्यस्तमितायदि। बुद्धियोगमुपाश्रित्यमाह्नतः सततं
भवइत्यादिश्रुतीनां॥ यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह॥ यन्मनसानमनुते॥ अन्यदेव
तद्विदितादथोऽविदितादधिकविज्ञाविज्ञातंविजानतांविज्ञानमविजानतां॥ अनाश्रितोपमे

एवंचसतिमनसैवानुद्रष्टव्यंयन्मनसानमनुतेइत्यनयोःश्रुत्योरविरोधः॥

यस्यपद्विजातंत्वयातिप्रतिपन्नोविज्ञातमात्मनातास्यांमत्यरंविद्धि॥ यद्वेयंततजडमित्या
दिश्रुतीस्मृतीनांचपरस्परविरोधमाशंक्यपरिहरति॥ एवंचसतिमनसैवानुद्रष्टव्यमि
ति॥ एवमुक्तेनप्रकारेणअज्ञानचैतन्यस्यवृत्तिव्याप्यत्वांगीकारेणफलव्याप्यत्वेप्रति
षिद्धेसतीत्यर्थः॥ तदेवाह॥ वृत्तिव्याप्यात्वमिति॥ ॥

अंतःकरणवृत्तिरावरणनिवृत्त्यर्थमज्ञानावच्छिन्नेचैतन्यं॥ व्याप्नोतीत्येतद्वृत्तिव्याप्यत्वमंगीकि
यते॥ आवरणभंगानंतरंस्वयंप्रकाशमानंचैतन्यंफलचैतन्यमित्युच्यते॥ तस्मिन्फलचैतन्येनि
फलंकेचित्तवृत्तिर्निव्याप्नोति॥ आवरणभंगस्यप्रागेवजातत्वेनप्रयोजनाभावादित्यर्थः॥
अस्मिन्नर्थेग्रंथांतरंसंवादयति॥ तदुक्तंफलव्याप्यत्वमिति॥ वृत्तिप्रतिबिंबितचैतन्याभासस्या
वृत्तिव्याप्यत्वांगीकारेणफलव्याप्यत्वेप्रतिषिद्धेसंप्रतिपादनात्॥ तदुक्तं॥ फलव्याप्यत्वमेवास्य
शास्त्रकृद्भिर्निवारितं॥ ब्रह्मण्यज्ञाननाशायवृत्तिव्याप्तिरपेक्षितेति॥ स्वयंप्रकाशमानत्वान्ना
भासउपयुज्यइतिजडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोस्ति॥
पिफलचैतन्यप्रकाशकत्वंने
त्यन्नापिसमतिमाह॥ स्वयमिति॥ इदानींजडपदार्थविषयिकचित्तवृत्तेब्रह्माकारवृत्त्यपेक्षया
वैलक्षण्यदर्शयितुमाह॥ जडपदार्थेति॥ अहंब्रह्मास्मीत्यज्ञानावच्छिन्नब्रह्माकारावृत्तिस्त
दावरकमज्ञानमात्रंनिवर्तयति॥ ब्रह्मातुस्वप्रकाशत्वात्स्वयमेवप्रकाशते॥ ननुवृत्तिप्र
तिबिंबितचिदाभासेनचैतन्यप्रकाशतेनत्रतस्याभासमप्यात्॥ अयंघटइतिपटाकारा॥

कारितचित्तवृत्तिस्तद्घटावच्छिन्नचैतन्यावरकाज्ञानं निवर्त्यमाना स्वप्रतिबिंबितचिदाभासेन जडं घटम
पि प्रकाशयति।। अतस्ततो विशेषोस्तीत्यर्थः।। एतदेव प्रपंचयितुं प्रतिजानीते।। तथा हीति।। चित्तवृ
त्तिमभिनीय दर्शयति।। अयमिति।। वृत्तिसंबंधात्प्राक् घटस्याज्ञातत्वादज्ञातं घटं विषयीकृत्य प्र
वृत्ता चित्तवृत्तिर्घटगताज्ञानं दूरीकुर्वाणा घटमपि भासयतीत्यर्थः।। अस्मिन्नर्थे वृद्धसंमतिमा

तथा त्वयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपु
रःसरं स्वगतचिदाभासेन जडं घटमपि भासयति।। यथा दीपप्रभामंडलमंधकारगतं घ
टपटादिकं किंचिद्विषयीकृत्य तद्गतांधकारनिरसनपुरःसरं स्वप्रभया तदपि भासयति।।

ह।। तदुक्तं।। बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटं। तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरे
त्।। बुद्धिस्तत्र बुद्धौ प्रतिबिंबितचिदाभासश्च बुद्धिचिदाभासौ घटं व्याप्नुतः तत्र तयोर्मध्ये धि
या वृत्त्या घटाज्ञानं नश्येत् चिदाभासेन तु घटः स्फुरेदित्यर्थः।। अत्रानुरूपं दृष्टांतमाह।। यथा
दीपप्रभा इति।। यथांधकारावच्छिन्नं घटादिकं विषयीकृत्य प्रवर्तमानदीपप्रभामंडलं
घटावरका

निवृत्तिद्वारा स्वप्रभया घटादिकं प्रकाशयति तद्वदित्यर्थः।। इयता ग्रंथजालेन प्रतिपादितस्य प्रत्य
ग्भिन्नपरमानंदाखंडचैतन्यस्य साक्षात्कारलक्षणमखंडाकारांतःकरणवृत्तिं प्रतिपादयितुं तत्सा
धनभूतश्रवणादेरवश्यानुष्ठेयत्वं।। तेषां लक्षणानि क्रमेण दर्शयति।। एवंभूतेत्यादिना।। द्वैतवस्त्व
भासत इत्यंतेन।। एवंभूतस्योक्तश्रुतियुक्त्यनुभवैर्निरस्तसमस्तोपाधिप्रत्यग्भिन्नपरमानंदचिद्रूप

एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यंतं श्रवणमनननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षि
तत्वात्तेपि प्रदर्श्यंते।। श्रवणं नाम षड्विधलिंगैरशेषवेदांतानामद्वितीयवस्तुनि तात्पर्यावधा
रणं।। लिंगानि तूपक्रमोपसंहारावभ्यासोऽपूर्वता फलार्थवादोपपत्त्याख्यानि लिंगतात्पर्या

स्य साक्षात्कारपर्यंतं श्रवणाद्यनुष्ठेयानीति प्रतिजानीते।। अपीति श्रवणादयोपीत्यर्थः।। नि।।
तत्र श्रवणस्य लक्षणमाह।। षड्विधेति।। तमर्थं गमयतीति लिंगं ज्ञापकं वस्तुतत्त्वे ब्रह्मात्मैकत्वनि
श्चयके रुपक्रमोपसंहारादिषड्विधलिंगैः सर्वेषां वेदांतवाक्यानामद्वितीये ब्रह्मणि तात्पर्य
निश्चयः श्रवणमित्यर्थः।। तानि च लिंगानि क्रमणोपदिशति।। ।।

उपक्रमेति॥ तथाचोक्तं॥ उपक्रमोपसंहारावभ्यासोऽपूर्वताफलं॥ अर्थवादोपपत्ती च लिंगं तात्पर्यनि
र्णय इति॥ उपक्रमोपसंहाराविति तावद्दर्शयति॥ प्रकरणप्रतिपाद्यस्येति॥ तदुदाहृत्य दर्शयति॥ यथे
ति॥ एकमेवाद्वितीयमित्युपक्रम्य ऐतदात्म्यमिदं सर्वमिति प्रतिपादनमुपक्रमोपसंहारावित्यर्थः॥

प्रकरणप्रतिपाद्यस्य तदाद्यंतयोरुपपादनमुपक्रमोपसंहारौ॥ यथा छांदोग्ये षष्ठप्रपा
ठके॥ प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादावैतदात्म्यमित्यंते च प्र
तिपादनं॥ प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः॥ यथा तत्रै
वाद्वितीयवस्तुनि मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनं॥ प्रकरणप्रतिपाद्यस्याद्वि
तीयवस्तुनः प्रमाणांतरेणाविषयीकरणमपूर्वता॥ यथा तत्रैवाद्वितीयवस्तुनो मानांत
राविषयीकरणं॥ ॥ अभ्यासस्य लक्षणमाह॥ पौनःपुन्येनेति॥ अत्रापि श्रुतिमुदाहरति॥ राम०
अपूर्वत्वस्य लक्षणमाह॥ प्रमाणांतरेति॥ तत्त्वौपनिषदं पुरुषं पृच्छामीत्यादिश्रुतिभिरुपनिषन्मा ३८
त्रवेद्यत्वप्रतिपादनाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः॥ ॥

अथवा ब्रह्मस्वप्रकाशत्वेन स्वव्यवहाराय स्वातिरिक्तप्रमाणानपेक्षत्वात् ब्रह्मणोऽपूर्वत्वमि
त्यर्थः॥ क्रमप्राप्तस्य फलस्य लक्षणमाह॥ फलंत्विति॥ अत्रानुरूपमुदाहरणमाह॥ आचार्यवा
न्पुरुषो वेदेत्यादिश्रवणादेः साधनानां ब्रह्मात्मैकत्वविज्ञानं प्रयोजनं॥ प्रब्रह्मज्ञानस्य तु तत्प्रा
प्तिफलं ब्रह्मविद्ब्रह्मैव भवति॥ तरति शोकमात्मविदित्यादिश्रुतेरित्यर्थः॥ अत्रापि श्रुतिमा
फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र श्रूयमाणं प्रयोजनं॥
यथा तत्राचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति अद्वितीयवस्तु
ज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते॥ प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः॥ यथा
तत्रोत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति॥ अमतं अविज्ञातमद्वितीयवस्तुप्रशंसनं॥ प्रकर
णप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः॥

ह॥ उत तमादेशमित्यादि येनाश्रुतं
भवति॥ येन सकलप्रपंचाधिष्ठानब्रह्मस्वरूपश्रवणेनाश्रुतं प्रपंचजातमपि श्रुतं भवति॥
येन ब्रह्मज्ञानेनाज्ञातं सर्वं जगत् ज्ञातं भवति येन ब्रह्मसाक्षात्कारेण साक्षात्॥

कृतं सर्वं भवति॥ब्रह्मणः सर्वतःसंप्लुतोदकस्थानीयत्वादित्यर्थः॥अवशिष्टाया उपपत्तेर्लक्षणमाह।
युक्तिरिति॥तामुदाहरति यथेति॥मृद्विकारेषु घटादिषु विकारनामधेययोर्वाचारंभणमात्रत्वेन य
था मृत्त्वमेवावशिष्यते नान्यत्॥तथा विवर्त्तस्य प्रपंचस्य गिरिनदीसमुद्रात्मकविकारनामधेययोर्वाचा
रंभणमात्रत्वाच्चिन्मात्रमेवावशिष्यते॥रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रावशेषवदित्यर्थः॥श्रवण
तत्र यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्ये
व सत्यमित्यादौ अद्वितीयवस्तुसाधने विकारस्य वाचारंभणमात्रत्वे युक्तिरुपपत्तिः श्रूयते॥म
ननं तु श्रुतस्याऽद्वितीयवस्तुनो वेदांतानुगुणयुक्तिभिरनवरतमनुचिंतनं॥विजातीयदेहादि
प्रत्ययरहिताऽद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनं॥ निरूपणानंतरं तदुत्तरांगस्य
मननस्य लक्षणमाह॥मननं त्विति॥षड्विधलिंगतात्पर्यपूर्वकं श्रुतस्याद्वितीयब्रह्मणो वेदांतावि
रोधिनीभिर्युक्तिभिर्नैरंतर्येणानुचिंतनं मननमित्यर्थः॥निदिध्यासनस्य लक्षणमाह॥विजातीये
ति॥विजातीयदेहादिबुद्ध्यंतजडपदार्थानिराकरणेन सजा॥

तीयाद्वितीयवस्तुविषयिकप्रवाहीकारणं निदिध्यासनमित्यर्थः॥व्युत्थानविरोधसंस्कारयोर
भिभवप्रादुर्भावे सति चित्तस्यैकाग्रतापरिणामः समाधिः॥स च द्विविध इत्याह॥सविकल्पको निर्वि
कल्पश्च॥तस्य लक्षणमाह॥तत्र तयोः सविकल्पकनिर्विकल्पकयोर्मध्ये सविकल्पकोपि द्विवि
धः॥अहं ब्रह्मास्मीति शब्दानुविरुद्धतयाऽद्वितीयवस्तुन्यविच्छेदेन चित्तवृत्तेरवस्थानमित्यर्थः॥
ननु नकिते पिलक्ष्णुनेन शांतो व्याधिरिति न्यायेनोक्तसविकल्पकसमाध्योः सकलभेदनिराक
समाधिर्द्विविधः॥सविकल्पको निर्विकल्पकश्चेति॥तत्र सविकल्पो नाम ज्ञातृज्ञानादिविकल्प
लयाऽनपेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानं॥तदा मृन्मयगजा
दिभाने मृद्भानवत् द्वैतभानेपि अद्वैतं वस्तु भासते॥ रणाय प्रवर्त्तनात्तयोरपि ज्ञात्रादिभेदवि
षयत्वेनाद्वैतमात्रवस्तुभानं तत्र नेत्यादिआशंक्योत्तरमाह॥तदेति॥तदा सविकल्पकसमा
ध्यनुभवकाले ज्ञात्रादिभेदप्रतीतावप्यद्वैतवस्तु भासत एवेति॥सुवर्णमयकुंडलादिभानेपि सुव
र्णभानवन्मृन्मयगजादिभानेपि मृद्भानवच्च गजादिभानस्य वाचारंभणमात्रवत् ज्ञात्रादिभानस्या
पि वाचारंभणमात्रत्वात् द्वैतमेव वस्तु भासत इत्यर्थः॥॥

सर्वं खल्विदं ब्रह्म ऐतदात्म्यमिदं सर्वमित्यादिश्रुतिबलात्॥ सर्वमहमिति गिरिनदीसमुद्रात्मकं सर्वं
जगत्स्वात्मानं सच्चिदानंदब्रह्मत्वेनानुभूयतस्य दग्धपटन्यायेन प्रपंचमानेऽप्यद्वैतं सच्चिदानंद
लक्षणं वस्तु भासत एवेत्यर्थः॥ तदुक्तं॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इति॥ भूतका
रोऽप्यस्मिन्नर्थे ग्रंथांतरसंमतिं दर्शयति॥ तदुक्तं॥ दृशिस्वरूपमिति॥ ओमिति परं ब्रह्म तदे
वाहमित्यन्वयः॥ किं तदित्याह॥ दृशिर्दृष्टिस्तस्याः स्वरूपं दृष्टात्वं तद्यस्य परमात्मस्वरूपं यस्य

दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं॥

तद्दृशिस्वरूपं साक्षिस्वरूपमित्यर्थः॥ तदुक्तं भगवता॥ उपद्रष्टानुमंता च भर्ता भोक्ता महेश्व
र॥ परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः पर इति॥ किंपुनः तद्रूपं गगनोपमं गगनं उपमो
शातो यस्य तत् गगनोपमं गगनवन्निर्लेपस्वरूपमित्यर्थः॥ तथा च भगवद्वचनं॥ यथा सर्व
गतं सौक्ष्म्यादाकाशं नोपलिप्यते॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥ यद्वा गगनो
पमं गगनवद्व्याप्तस्वरूपमित्यर्थः॥ आकाशशरीरं ब्रह्मेति श्रुतेः॥ पुनः किंभूतं सकृद्विभातं
सकृदेव विभातं सर्वदैकस्वरूपेण भासमानं॥

श्रु

शश्वद्दिप्रकाशवत् वृद्धिक्षयशीलमित्यर्थः॥ पुनः किंरूपं अजं जन्मरहितं॥ एकं निरस्तसर्वोपा
धिभेदं अक्षरं विनाशधर्मराहित्येन कूटस्थमित्यर्थः॥ तथा च भगवानाह॥ क्षरः सर्वाणि भूतानि
कूटस्थोऽक्षर उच्यते॥ अलेपकं॥ असंगत्वादविद्यादिदोषरहितमित्यर्थः॥ असंगो ह्ययं पुरुष इति
श्रुतेः॥ सर्वगतं सर्वत्र ब्रह्मादिस्थावरांतेषु गतं व्याप्तं॥ अद्वयं सजातीयभेदराहित्येनाद्वितीयं रहि
तं॥ सततं विमुक्तमिति॥ सर्वदा कार्यकारणात्मकसर्वोपाधिविनिर्मुक्तत्वेन सततैकरूपमित्यर्थः॥
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तः॥ १॥ निर्विकल्पकस्तु ज्ञातृज्ञानादिविक
ल्पलयापेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्था
नं॥ तथा च भागवते॥ बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुत इति॥ तथा च एतादृनिरतिशयानं
दं परं ब्रह्म तदेवाहमिति ज्ञानवृत्तौ निषेधप्रतियोगित्वेन तदुपाधिनाशात्प्रयुक्तभेदभाने
ऽप्यद्वैतं भासत एवेत्यर्थः॥ २॥ निर्विकल्पकसमाधिस्वरूपमाह॥ अयं च द्विविधः चिरकालाभ्यस्त
तदुत्तरसविकल्पकसमाध्यनुभवजनितसंस्कारसहकृतायाश्चित्तवृत्तेर्निद्रादिविपरीतलयपूर्व
कम

द्वैतवस्तुन्येवल्कोलीभावेनावस्थात्मकः प्रथमः॥ एतन्निर्विकल्पकसमाध्यभ्यासपाटवेन लुप्तसं
स्कारतया ज्ञातृज्ञानादित्रिपुटीलयपूर्वकमखंडाकारितयाश्चित्तवृत्तेनापि स्फूर्त्तिकेवलं चिदानंदात्म
नावस्थानात्मको द्वितीयः॥ तत्र द्वितीयपक्षमभिप्रेत्याह॥ ज्ञातृज्ञानादिति॥ नन्वेवं समाधिसुषु
प्त्योर्विक्षेपाभावेन वृत्त्यज्ञानादर्शनेदं आशंकापरिहरति॥ ततश्चेति॥ तत्र युक्तिमाह॥ उभयत्र इति॥

तदा जलाकाराकारितलवणानवभासेन जलमात्रमेवावभासवत् अद्वितीयवस्त्वाकारा
कारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमेवभासते॥ ततश्चास्य सुषुप्तेश्चाभेदशंका
न भवति॥ उभयत्र वृत्त्यज्ञाने समानेपि तत्सद्भावमात्रेण तयोर्भेदोपपत्तेः॥ अस्यांगानि य
मनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः॥

समाधिसुषुप्त्योरित्यर्थः॥ त
त्सद्भावेति समाध्यवस्थायां समानवृत्तिसद्भावात्। सुषुप्तौ वृत्त्यभावात् तयोर्भेदोपपत्तेरित्यर्थः।
उक्तसमाधेः साधनापेक्षायामाह॥ अस्यांगानीति॥ तानि च साधनानि क्रमेणोपदिशति।
यमाद्यष्टांगानि समाधेरंतरंगसाधनानीत्यर्थः॥ प्रथमं यमस्य लक्षणमाह॥ तत्रेति॥॥

तेषु यमाद्यष्टांगेषु मध्ये अहिंसादयः पंच यमा अवश्यानुष्ठेया इत्यर्थः॥ तदनंतरं नियमानाह॥ शौच
इति॥ शौचादयः पंच नियमा इत्यर्थः॥ आसनं लक्षयति॥ करचरणादीति॥ प्राणायामलक्षणमा
ह॥ रेचक इति॥ इडया पूरयेद्वायुं मुंचेद्दक्षिणयानिलं॥ यावत्श्वासं समासीनः कुंभयेत्सुषुम्न
या॥ यदा योगी पद्मासने उपविश्य योगमभ्यसति॥ तदा गुल्फाभ्यां गुदमूलं निपीड्य वै खेचरीमुद्रास

तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नि
यमाः॥ करचरणादिसंस्थानविशेषलक्षणानि आसनानि पद्मकस्वस्तिकाद्यासनानि॥
रेचकपूरककुंभकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः॥

हाभ्येन प्राणधारणया सुषुम्ना
मार्गेण मूलाधारात् कुंडलिनीमुत्थाप्य स्वाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्यानि वर्णाख्य
षट्चक्रभेदक्रमेण सहस्रदलकमलकर्णिकायां विद्यमानपरमात्मना सह हंसे योज्य तत्रैव चि
त्तं निवेश्य तदा पवनचलं कृत्वा स्वात्मानंदारसं पिबतीत्येतत्प्राणायामफलं॥ स च द्विविधः॥ अग
र्भसगर्भश्चेति॥ मुंचेद्दक्षिणया वायुं मात्राहीनं॥

वे०टी०
४२

मनन्यधीः ॥ पूरयेद्वामयातद्वत् कुंभयेच्चसुषुम्णया ॥ यावच्छ्वासजितश्वासोजवेन्मासात्जितेंद्रि
यः ॥ इतिप्रणवोच्चाररहितेनउक्तरेचकपूरककुंभकक्रमेणप्राणनिरोधोऽगर्भप्राणायामः
रेचयेत्षोडशोमोनेवततद्वैगुण्यंनपूरयेत् ॥ कुंभयेच्चचतुःषष्ट्याप्रणवार्थमनुस्मरन्नितिवच
नात् ॥ षोडशप्रणवंमनसाजपन् ॥ दक्षिणयावायुविरेच्य द्वात्रिंशत्संख्याकंप्रणवंमनसा
समुच्चरन्वामयावायुआपूर्यचतुःषष्टिसंख्याकंप्रणवंमनसैवजपतत्तदर्धंच ॥ अकारउ
कारमकारार्द्धमात्रात्मकसार्द्धत्रिवलयाकारकुंडलिनीरूपंचिदानंदकंचमूलादिब्रह्म
रंध्रांतमनुसंदधत् ॥ सुषुम्णयाच्छिन्नमपितदेकप्रवणंकुर्वन्यावत्सकुंभयेत् ॥ तदुक्त
माचार्यैः ॥ षोडशातद्द्विगुणचतुःषष्टिमात्राणिचतानिचक्रमशः रेचकपूरककुंभकभेदै
स्त्रिविधः ॥ प्रभंजनायामइतिप्राणायामप्रकारः ॥ क्रमप्राप्तंप्रत्याहारंनिरूपयति ॥ इंद्रिया
णामिति । राम० ४२

प

श्रोत्रादीनामिंद्रियाणांस्वस्वविषयेभ्यः सकाशात्पाषाणोपरिप्रयुक्तः शरसंघातइवतत्त्यावर्तनं
प्रत्याहारः ॥ नत्विंद्रियाणांस्वस्वविषयेभ्योनिवर्तनंप्रत्याहारइत्युक्तंतत्रसंभवति ॥ शब्दादिविषया
णांसुखसाधनत्वेनवैषयिकसुखव्यतिरिक्तनिरतिशयानंदसद्भावेप्रमाणाभावात् ॥ हिरण्यगर्भा
द्यभ्यतयोगस्येश्वरेणापित्यक्तुमशक्यत्वादितिचेन्नः ॥ मूढैकर्मजडैर्विषयलंपटैस्त्यक्तुमशक्यत्वे
पिशुद्धांतःकरणेनसंसाराविद्यकत्वदर्शनात् विषयदोषदर्शनेनतुच्छीकृतशब्दादिविषयप्रपं
इंद्रियाइणांस्वस्वविषयेभ्यःप्रत्याहरणंप्रत्याहारः ॥ एवमेवलोकमीसंतः प्रव्राजिनः प्रव्रजंति ।
चेनपुरुषोत्तमेनपुरीषवत्त्यक्तुमशक्यत्वात् ॥ अन्यथासंसारएवलोलुप्येनतस्मात्न्यासमे
तेषांतपसामतिरिक्तमाह ॥ एवमिति ॥ एतत्सर्वंजूःस्वाहाइत्यप्सुपरित्यज्यआत्मानमन्विच्छे
त् ॥ त्यागेनैकोअमृतत्वमानशुः ब्रह्मचर्यादेवप्रव्रजेत् ॥ यदहरेवविरजेत्तदहरेवप्रव्रजेत् ।
वतासयेदार्द्गासर्वधर्मान्परित्यज्यमामेकंशरणंव्रजेदितिसंसारमेवनिःसारंदृष्ट्वासारदि
दृक्षया ॥ प्रव्रजंतकृतोद्वाहाः परंवैराग्यमाश्रिताः ॥ प्रत्यग्विविदिः ॥

घाति धैवेदानुवचनादयः॥ ब्रह्मात्मैक्यं न त्यागमी यंतीतिश्रुतेर्बलात् तद्वत्यादिश्रुतिस्मृतिभिः॥ तथा
आनंदो ब्रह्मेति वचनात्॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति॥ एवमस्य परमानंदः
आत्मैवानंदः पदेष आकाश आनंदो स्यात्॥ आनंदाद्येव खल्वित्यादिश्रुतिभिश्च नित्यात्मसुखस्य
प्रतिपादनात्॥ शास्त्रादिवैषयिकसुखव्यतिरिक्तनिरतिशयानंदसद्भावे प्रमाणं शास्त्रादित्येतदपि

अद्वितीयवस्तुन्यंतरिंद्रियधारणं धारणा॥ तत्राद्वितीयवस्तुनि अविच्छिन्नविच्छिन्नांतरिंद्रियवृ
त्तिप्रवाहो ध्यानं॥ समाधिस्तूक्तलक्षणः सविकल्पक एव॥ अस्य निर्विकल्पस्यांगिनो लयविक्षे
पकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति॥ निरसनं बोध्यं॥ संप्रति धारणां लक्षयति॥ अद्वि
तीय इति॥ सर्वेषां बुद्धिसाक्षितया विद्यमाने वस्तुनि चित्तनिवेशनं धारणेत्यर्थः॥ धारणापटवाभ्या
से न चित्तस्थैर्यजननात्॥ अद्वितीयवस्तुन्यविच्छिन्नविच्छिन्नांतरिंद्रियप्रवाहिकं ध्यानमित्याह॥
तत्रेति॥ समाधिस्तूक्तलक्षणः सविकल्पकसमर्थस्त्वाह॥ समाधिरिति॥ उक्तयमाद्यष्टांग
सहितनिर्विकल्पसमाधिं निर्विघ्नानुष्ठानसिद्धये विघ्नज्ञानमतिरेके॥

नानिवारणस्य कर्तुमशक्यत्वात्॥ अस्य चतुरो विघ्नान् संदर्शयति॥ अस्येति॥ तत्राद्यविघ्नं लक्षयति॥ ल
यस्तावत् लयो द्विविधः॥ चिरकालमुक्ताष्टांगसहितनिर्विकल्पकसमाध्यभ्यासमाध्यस्या समाधौ प्रत्यक्
चेतनानितत् लोहितलक्षितजलबिंदुवत्तैलरहितदीपकलिकावच्च प्रत्यग्भिन्नपरमानंदे चित्तस्तैल
पः प्रथमः॥ द्वितीयस्तु सुषुप्त्यवस्थानवत् आलस्येन चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहणादरे सति

लयस्तावत् अखंडवस्त्वनवलंबनेन चित्तवृत्तेर्निद्रा॥ अ
खंडवस्त्वनवलंबनेन चित्तवृत्तेरन्यानवलंबनं विक्षेपः॥

प्रत्यगात्मस्वरूपानवभासनात् वृत्तेस्तब्धीभावलक्षणनिद्रारूपः॥ तत्राद्यसंगीकृत्य द्विती
यस्य विघ्नत्वेन तत्याद्यतत्स्वरूपमाह॥ अखंडइति॥ अखंडवस्तुग्रहणापातमुखतया
प्रवृत्तायाश्चित्तवृत्तेश्चिदनवलंबनेन अस्तयक्षिवस्तुन बात्यविषयग्रहणाय प्रवृत्तिवि
क्षेप इत्यर्थः॥ तृतीयं विघ्नमाह॥ लयविक्षेप इति॥॥

वे०टी० ४४

रागादयस्त्रिविधा॥ बाह्या: आभ्यंतरा: वासनामात्ररूपाश्चेति॥ बाह्या: पुत्रादिविषया:॥ आभ्यंतरा मनोरा
ज्यादय:॥ संस्काररूपा वासनामया:॥ तत्रानेकजन्माभ्यस्तबाह्याभ्यंतररागाद्यनुभवजनितसंस्कारै:
कलुषीकृतचित्तं कथंचित् श्रवणादिसाधनेनांतर्मुखमपि चैतन्यग्रहणसामर्थ्याभावात् मध्ये एव स्त
ब्धीभवति॥ यथा राजदर्शनाय स्वगृहान्निर्गत्य राजमंदिरं प्रविष्टस्य कस्यचित्पुरुषस्य द्वारपालनि
रोधेन स्तब्धीभाव:॥ तथा परित्यक्तबाह्यविषयस्याखंडवस्तुग्रहणाय प्रवृत्तस्याप्युद्भूतरागादिसं
लयविक्षेपाभावेपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखंडवस्त्वनवलंबनं कषाय:॥ अ
खंडवस्त्ववलंबनेनापि चित्तवृत्ते: सविकल्पकानंदास्वादनं रसास्वाद:॥
स्कारैस्तब्धीभावा
दखंडवस्तुग्रहणं कषाय इत्यर्थ:॥ चतुर्थं विघ्नमाह॥ अखंड इति॥ उक्तसविकल्पकसमा
धौ मध्ये द्वितीयशब्दानुविद्धस्त्रिपुटीविशिष्टस्तस्मिन्नुदय आनंदो बाह्यशब्दादिविषयप्र
पंचभारत्यागप्रयुक्तो न तु चैतन्यप्रयुक्त:॥ यथा निधिग्रहणाय प्रवृत्तस्य निधिपरिपालक राम· ४४
भूतप्रेताद्याहतस्य निधिप्राप्त्यभावेपि भूताद्यनिष्टनिवृत्तिमात्रेण कोपि महानंदो भवति॥
तथा

सविकल्पसमाध्यवस्थायामवलंबनेन नित्यानंदरसास्वादनाभावेपि बाह्यप्रपंचनिवृत्तिजन्यानंदं सविक
ल्पकरूपं ब्रह्मानंदभ्रमेणास्वादयति तद्रसास्वादनमित्यर्थ:॥ लक्षणांतरमाह॥ समाध्येति॥ निर्विक
ल्पसमाध्यारंभकालेऽनुभूयमानसविकल्पकानंदरसास्वाद इत्यनया पुनस्तस्यैवास्वादनं वा
स्वादनमित्यर्थ:॥ प्रोक्तविघ्नचतुष्टयनिवृत्ते: फलमाह॥ अनेनेति॥ लयाद्यभावसहितं चित्तं यथा
समाध्यारंभसमये सविकल्पकानंदास्वादनं वा॥ अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वा
तदीपवदचलं सदखंडचैतन्यमात्रं भवति तदा निर्विकल्पकसमाधिरुच्यते॥ तदुक्तं॥ लये सं
बोधयेच्चित्तं विक्षिप्तं शमयेत्पुन:॥ निर्वातदीपवदचलमखंडचैतन्यमात्रं भवति एतेन तदपि निर्विकल्प
कसमाधिरित्यर्थ:॥ लयादिविघ्नसद्भावे तन्निवृत्तिप्रकारे च वृद्धसंमतिमाह॥ तदुक्तं॥ लये यमि
ति इति पूर्वोक्तनिद्रालक्षणे लये जाते सति तन्निवृत्त्यर्थं चित्तं संबोधयेत्॥ चित्तगतजाड्यादि
परित्यागेन चित्तं प्रबोधयेत्॥ तदुक्तं च॥ विक्षेपयुक्तं चित्तं यदा भवति तदा विषयवैराग्यादिना
चित्तं शमयेत्॥ ॥

बहिर्मुखतां परित्यज्यांतर्मुखं कुर्यात्॥ उक्तरागादिकषायसहितं चित्तं यदा भवेत्तदा विजायात्॥ इयं
रागादिवासना बाह्या विषयप्रापकानलखंडवस्तुप्रापका॥ अतो नेयं समीचीना इति विचार्य प्रत्यक्प्रव
णं वासनायाः सकाशादिनिकृष्टमतस्मा ज्येयमिति विजानीयादित्यर्थः॥ यद्वा॥ सम्यग्वस्तुनिश्च
याभ्नं चित्तं यदा भवति॥ तदा तच्चित्तं कषायसहितं विजानीयात्॥ तच्चित्तं यावता कालेन रागादिवास
नाक्षयसहितं भवति तावत्काले स चित्तं स्वादस्वाचाञ्चालयेत्॥ इति सर्वोक्तं सविकल्पकरसंवि

सकषायं विजानीयात् समप्राप्तं न चालयेत्॥
नास्वादयेद्रसं तत्र निःसंगः प्रज्ञया भवेत्॥ १॥

षयप्रपंचत्यागत्यागजन्यं नास्वादयेन्नानुभवेत्॥ तत्र युक्तिमाह॥ निःसंग इति॥ यतो निःसं
गो वैषयिकसुखदुःखादिसंगरहितः॥ अतः प्रज्ञया युक्तो भवेत्॥ स्थितप्रज्ञो भवेदित्यर्थः॥
तदुक्तं भगवता॥ प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्॥ आत्मन्येवात्मना तुष्टः
स्थितःप्रज्ञस्तदोच्यते॥ तस्माल्लयादिविघ्नाभावविशिष्टचित्तस्य चैतन्यमात्रतया अवस्थानं निर्वि
कल्पकसमाधिरित्यर्थः॥ ॥

ण

तत्रभावनामाह॥ यथा दीप इति॥ अथ निर्विकल्पकसमाधौ स्वगुरूपदिष्टमार्गेण यथामति किंचिद्वि
चार्यते॥ पंचभूमिकोपेतस्य चित्तस्य भूमिकापत्रयपरित्यागेन अवशिष्टभूमिकाद्वयं समाधिरि
त्युच्यते॥ निद्रातंद्रादियुक्तं चित्तं मूढमित्युच्यते॥ कदाचिद्ध्यानयुक्तं बहिर्गमनशीलमपि उक्तक्षि
प्तादिविशिष्टतया विक्षिप्तचित्तमुच्यते॥ तत्र क्षिप्तमूढयोः समाधित्वशंकैव नास्ति॥ विक्षिप्ते तु चेतसि विक्षे
पतः तिपादर्शनांतर्भूतजीवचित्तस्य सद्य एव विनाशात्तदापि न समाधिः॥ एकाग्रतां पतंजलिः सू

यथा दीपो निवातस्थो नेंगते सोपमा स्मृता इति॥ २॥

त्रयति शांतोदितौ तुल्यप्रत्ययौकाग्रतापरिणाम इति अस्यार्थः॥ शांतोऽतीतः उदितो वर्तमा
नःप्रत्ययश्चित्तवृत्तिः॥ अतीततत्प्रत्ययो यं पदार्थं परिगृह्णाति उदितोऽपि तमेव चेत्॥ एवं तु यावत्तदा
ता तु तौ तुल्यप्रत्ययौ भवतः॥ तादृश एव चित्तस्य परिणाम एकाग्रतेत्युच्यते॥ एकाग्रताभि
वृद्धिलक्षणं समाधिं सूत्रयति॥ सर्वार्थैकाग्रतयोः क्षयोदयौ चित्तस्य परिणामः समाधिरिति
रजोगुणेन चाल्यमानं चित्तं क्रमेण सर्वार्थं परिगृह्णाति॥ ॥

तस्य रजोगुणनिरोधाय क्रियमाणेन प्रयत्नविशेषेण दिने दिने योगिनः सर्वार्थिता क्षीयते॥ एकाग्रता चेतिताद्
शश्चित्तस्य परिणामः समाधिरित्यर्थः॥ अस्य समाधेरष्टाङ्गं यमनियमासनप्राणायामप्रत्याहाराः॥ पंच
बहिरंगाणि हिंसादिभ्यो योगिनं कर्मभ्यो यमयंति निवर्तयंतीत्यहिंसादयो यमाः॥ जन्महेतुकाम्यधर्मान्नि
वृत्य मोक्षहेतौ निष्कामधर्मे नियमयंति प्रेरयंतीति शौचादयो नियमाः॥ यमनियमयोरनुष्ठानवै
लक्षण्यं स्मर्यते॥ यमान्सेवेत सततं न नित्यं नियमान्बुधः॥ यमान्पतत्यकुर्वाणो नियमान्के
वलान्भजन्निति॥ बुद्ध्वा यमनियमौ समीक्ष्य यमबहुलेषु प्रयत्नेषु बुद्धिमनुसंदधीत॥ आस
नप्राणायामप्रत्याहारा विख्याताः॥ ध्यानधारणासमाधित्रयं मनोविषयत्वात्॥ संप्रज्ञातसम
धेरंतरंगं यमादि तु बहिरंगं॥ तथा च केनापि पुण्येनांतरंगे प्रथमं लब्धे सति बहिरंगलाभाय
नातिप्रयासः कर्तव्यः॥ यद्यपि पातंजलिना लौकिकतत्त्वतन्मात्रेंद्रियाकारविषयाः संप्रज्ञातसमा
धयो बहुधा प्रपंचिताः॥ तथापि तेषामंतर्धानाकाशगमनादिसिद्धिहेतुतया मुमुक्षिहेतुसमाधि
विरोधित्वान्नास्माभिस्तत्रादरः क्रियते॥ तथा चोक्तं वासिष्ठे॥ श्रीराम उवाच॥ जीवन्मुक्तिशरी
राणां कथमात्मविदां वर॥ शक्तयो नेह दृश्यंते आकाशगमनादिकाः॥ श्रीवसिष्ठ उवाच॥ अदा
त्मविदमुक्तोपि सिद्धिजालानि वांछति॥ द्रव्यमंत्रक्रियाकालयुक्त्याप्नो ॥

त्येव राघव॥ नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्मनात्मदृक्॥ आत्मनात्मनि संतुष्टो नाविद्यामनुधावति॥
ये केचन पदार्था वा नस्तान्विद्यामयान्विदुः॥ कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति॥ द्रव्यमंत्रक्रि
याकालयुक्तयः साधुसिद्धिदाः॥ परमात्मपदप्राप्तौ नोपकुर्वंति काश्चनेति॥ आत्मविषयस्तु संप्रज्ञातस
माधिर्वमिताक्षयस्य निरोधसमाधेर्हेतुः॥ तस्मात्तत्रादरो कृतः॥ अयं पंचभूमिकारूपश्चि
त्तस्य निरोधलक्षणः समाधिर्निरूप्यते॥ स च समाधिसूत्रयतिर्व्युत्थाननिरोधसंस्कारयोर्निरो
धः परिणाम इति॥ व्युत्थानसंस्काराः समाधिविरोधिनः॥ ते च निरुद्धहेतुना योगिप्रयत्नेन प्र
तिदिनं प्रतिक्षणं वाभिभूयंते॥ तद्विरोधिनश्च संस्काराः प्रादुर्भवंति॥ तथा सति निरोधैकस्मि
न्क्षणे चित्तमनुगच्छति॥ सोयमीदृशश्चित्तस्य परिणामो भवति यदा असंप्रज्ञातसमाधि
रुच्यते इत्यर्थः॥ एतच्च समाधिद्वयं जीवन्मुक्तस्वरूपं प्रतिपादयितुं प्रतिजानीते॥ अथ जी
वन्मुक्तस्येति॥॥

वे०टी० तस्य लक्षणमाह॥ जीवन्मुक्तो नामेत्यादिना ब्रह्मनिष्ठ इत्यंतेन॥ अखिलबंधरहितो ब्रह्मनिष्ठो जीव
४१ न्मुक्त इति तस्य लक्षणं॥ जीवितः पुरुषस्य हि कर्तृत्वभोक्तृत्वसुखदुःखलक्षणोऽखिलोऽपि चित्तध
र्मः क्लेशरूपत्वाद्बंधो भवति॥ तेन रहितः परित्यक्तबंधनः ब्रह्मणि निष्ठा तदेकपरता यस्य सः
ब्रह्मनिष्ठः जीवन्मुक्त इत्यर्थः॥ सकलबंधराहित्ये हेतुमाह॥ स्वस्वरूपेति॥ गुरुश्रुतिस्वानुभवैर्ब्र

अथ जीवन्मुक्तलक्षणमुच्यते॥ जीवन्मुक्तो नाम स्वस्वरूपाखंडब्रह्मज्ञानेन तदज्ञानबाधन
द्वारा स्वरूपाखंडब्रह्मणि साक्षात्कृते अज्ञानतत्कार्यसंचितकर्मसंशयविपर्ययादीनाम
पि बाधितत्वादखिलबंधरहितो ब्रह्मनिष्ठः॥ तदुक्तं॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंश
याः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुतेः॥ ब्रात्मैकत्वविज्ञानेन मूलाज्ञा
नतत्कार्यसंचितकर्मादीनां बाधितत्वात्सर्वबंधराहित्यमुपपद्यत इत्यर्थः॥ तथा च श्रुतिः राम
भिद्यत इति॥ ननु चैतादृशस्य जीवन्मुक्तस्य देहेंद्रियादिज्ञानमस्ति न वेत्याशंक्य दग्धपटन्या ४१
येनेंद्रजालनिर्मितसौधस्तंभादिवच्च बाधितानुवृत्त्या मिथ्यात्वेन ज्ञानेऽपि परमार्थः॥ ॥

तया नानं नेत्याह॥ अयमित्यादिना पश्यतीत्यंतेन॥ स्पष्टार्थः॥ अस्मिन्नर्थे श्रुतिमाह॥ सचक्षु
रिति॥ आचार्यवचनं प्रमाणयति॥ तदुक्तं सुषुप्ताविति॥ अहजगति सएवात्मविज्ञान्य इति मे नि

रूपं तु मुक्तानसमर्थे मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणांध्यमांद्यपटुत्वादिभाजनेनेंद्रिय
ग्रामेण अशनायापिपासाशोकमोहादिभाजनेनांतःकरणेन च तत्तत्पूर्ववासनया क्रियमाणानि कर्मा
णि भुज्यमानानि ज्ञानविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति॥ यथेंद्रजालमि
ति ज्ञानवांस्तदिंद्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति॥ सचक्षुरचक्षुरिव सकर्णोऽकर्ण इवे
ति श्रुतेः॥ उक्तं च सुषुप्तवज्जाग्रति यो न पश्यति द्वयं तु पश्यन्नपि चाद्वयं तत्त्वतः॥ तथा च कुर्व
न्नपि निःक्रियश्च स आत्मविन्नान्य इतीह निश्चयः इति॥ ध्यप इत्यन्वय इत्यन्वयः॥ सकृ इत्यपेक्षा
यामाह॥ य इति॥ कोऽपि महापुरुषो ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धिः सुषुप्त्य
वस्थायां यथा द्वैतं न पश्यति तथा ब्रह्मदृष्टिदार्ढ्येन जाग्रदवस्थायामपि द्वैतं न पश्यति तद्व्य
ब्रह्मव्यतिरिक्तजडपदार्थाभावात्स तथोक्तः॥ किं च कदाचिद्युत॥

वे० टी०
४९

दशायामविद्यकसंस्कारलेशाद्भिक्षाटनादिव्यवहारेण द्वयं प्रपञ्चमपि समाधव्यासस्सामर्थ्यवशाद
दयत्वेन पश्यति॥ स च तथोक्तः यथा लोकसंग्रहार्थमित्यादिकमपि कुर्वन्नपि आत्मनि कर्तृत्वाभा
वनिश्चयेन निःक्रियः कर्मरहितो भवति कर्मफले न लिप्यते स जीवन्मुक्तो नात्र संशयः कर्तव्य इ
त्यर्थः॥ नन्वस्य जीवन्मुक्तस्य यणोश्चयेन जीवन्मुक्तस्य योगीश्वरस्य मम पुण्यपापे लेपो नास्तीत
भिमानवशाद्यथेष्टाचरणप्रसंगमाशंक्य परिहरति॥ अस्येति॥ अस्येति॥ अस्य पूर्वोक्तजीवन्मु

अस्य ज्ञानात्पूर्वं विविधमानानामेव आहारविहारादीनामनुवृत्तिर्भवति॥ शुभाशुभवासनानामे
वानुवृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा॥ तदुक्तं॥ बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि॥
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे॥ क्तस्य ज्ञानात्प्रागेव शास्त्रादिगुणैः शुभवासनापानिवा
रितत्वात् संसारदशायामप्रपन्नेन आहारादिप्रवृत्तिवत्॥ किं ततदनुवृत्तेत्यत आह॥ शुभाशु
भेति॥ तस्माज्जीवन्मुक्तस्य यथेष्टाचरणसंगो नास्तीति भावः॥ अस्मिन्नर्थे ग्रंथांतरसंवादय राम.
ति॥ तदुक्तं बुद्धेति॥ जीवन्मुक्तस्य ब्रह्मज्ञानत्वाभिमानो नास्तीत्यर्थः॥ ॥ ४९

तत्रापि संमतिमाह॥ ब्रह्मवित्त्वमिति॥ ननु विदुषां यथेष्टाचरणप्रसंगो नास्तीत्युक्तं॥ तदनुपपन्नं नमान्तवधे
नेपितद्वधेन लिप्यते॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥ हत्वापि स इमाँल्लोकान्न हंति
न हन्यते इति हयमेधसहस्राण्यपि कुरुते ब्रह्महत्याघातलक्षाणि॥ परमार्थविन्न पुण्यैर्न च पापै
र्न लिप्यते मनुजः॥ अश्वमेधसहस्राणि ब्रह्महत्याशतानि च॥ कुर्वन्न लिप्यते यद्येकत्वेन पश्यति॥
स्वभावादनयेऽस्मात्तदर्थं यततेचयः॥ स पुनः समर्थंगं तुस्पंतं त्र्यब्धं न हाछुति॥ आरब्धकर्मनाना

ब्रह्मवित्त्वं यथा शुक्तः स आत्मज्ञो न चेतर इति॥

त्वाद्बुधानामन्यथा वर्तनं तेन त्वणस्तापैवि ज्ञातत्वं न पिडिरित्यादिश्रुतिस्मृतित्वभिप्रुक्तवाक्येर्वि
दुषां यथेष्टाचरणं त्वागीकारादीतिचेन्नत्यते षां वचनानां विद्वत्स्तुतिपरत्वेन तत्कर्तव्यमित्यत्र ता
त्पर्याभावात्॥ उक्तमाचार्यैः॥ अधर्माज्जातेऽत्तानं यथेष्टाचरणे ततः॥ धर्मकार्यैकपंतस्याद्युत्र
धर्मो विनश्यति॥ नन्वेवममानित्वमिदं भित्वमहिमाक्षांतिरार्जवइत्यादिस्मृत्युक्तसाधनस्य॥
अद्वेष्टा सर्वभूतानामित्यादिवचनैः प्रतिपाद्यमानाऽद्वेष्ट॥

त्वादिगुणसंभृतस्य विविदिषासंपाद्यमानश्रवणादिनैव सह विरोधमानं अमानित्वादिसंपादितस्य च विविदि
षासंन्यासविषयत्वाद्विदुषां तु लक्षणत्वेनालंकारवदनुवर्त्तमानात्वविरोध इत्याह ॥ जीवन्मुक्ताव
स्था यामित्यर्थः ॥ अस्मिन्नर्थे वार्त्तिकसंमतिमाह ॥ तदुक्तं उत्पन्नेत्येति ॥ द्विसंन्यासिनो जीवन्मुक्तस्य
अद्वेष्टृत्वादयो गुणाः अस्य विद्वत्संन्यासिनो जीवन्मुक्तस्य अद्वेष्टृत्वादयो गुणाः अयत्नतः स्वत एवनवं

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः ॥ सद्गुणाश्चालंकारवदनुवर्त्तंते ॥ तदुक्तं ॥
उत्पन्नात्मावबोधस्य त्वद्वेष्टृत्वादयो गुणाः ॥ अयत्नतो भवंत्यस्य न तु साधनरूपिण इति ॥

तिन तु साधनरूपिणः तं प्रति ते साधनरूपा न भवंति । तत्र हेतुमाह ॥ उत्पन्नेति ॥ यत उत्पन्न आत्मा
वबोधो ब्रह्मात्मैकत्वनिश्चयरूपः ॥ नतस्मस्मते गुणाः लक्षणत्वेनैव भवंतीत्यन्वयः ॥ इयता प्रति
बंधं न प्रतिपादितेस्मिन्वेदांतसाराख्ये ग्रंथे श्रीमत्परमगुरुपरमहंसपरिव्राजकाचार्यसदानंद
योगींद्रेण महापुरुषेणापवेदांतो नामेत्यारभ्य साधनचतुष्टयसंपन्नप्रमातुरधिकारिणः ॥ मूला
ज्ञाननिवृत्तिपरमानंदप्रसिद्धये प्रतीयमानापि द्युकसंकुलप्रपंचजा ॥

तस्य ब्रह्मण्यध्यारोपापवादप्रपुरःसरं सविस्तरं नि:प्रपंचत्वप्रतिपाद्य तत्साधनं च श्रवणादिकं सप्रपंच
मभिधाय तस्यैवाधिकारिणस्तत्वमस्यादिवाक्यश्रवणानंतरं ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभे
दबुद्धेर्जीवन्मुक्तत्वं प्रदर्शितं ॥ एतावतैव कार्यसिद्धिः किं बहुलेखनेनेति मनसि निधाय संप्रत्यस्यैव जी
वन्मुक्तस्य स्वप्रकाशान्यानंदानुभवैकनिरस्तभेदप्रतीत्यजाक्षेपि अविद्यालेशावशात् ॥ प्रारब्धकर्म

किं बहुनाऽयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रा
पितानि सुखदुःखलक्षणानि प्रारब्धफलान्यनुभवतः ॥

भुंजानो भिक्षाटनादिदेहयात्रामात्रा क्रियाविशिष्टब्रह्मरूपतया वर्तिष्यत इत्युपसंहरति ॥ किं बहु
नेत्यादिना ॥ प्रारब्धं त्रिविधं स्वेच्छानंतं भिक्षाटनादि समाध्यवस्थायां शिष्यादिभिर्दीपमानमन्ना
दिकं परेच्छाकृतं सुसाध्यवस्थायां मुत्थानदशायां वा आकाशफलपातवदकस्मात्प्रायमान
पाषाणपतनकंटकवेधादिकमनिच्छाकृतं स चायं जीवन्मुक्तः ॥ प्रोक्तत्रिविधप्रारब्धप्रापितं
सुखदुःखमनुभवन् ॥ ॥ ॥

वे॰टी॰ बुध्यादिसाक्षितयासर्वविलासनयोगेनारब्धकर्मक्षये सति प्रत्यगभिन्नपरमात्मनि प्राणादिलया
५० नंतरं प्रतिष्ठाविषयकसंसारः कृत्यः सन् गलितसकलभेदप्रतिभासो ब्रह्मैवावतिष्ठते इति रहस्यत
त्वयमित्यर्थः॥ अयं जीवन्मुक्तो बुध्याद्युपाधिविलये सति घटाद्युपाधिविनिर्मुक्ताकाशवन्मुक्त

अंतःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानंदपरे ब्र
ह्मणि प्राणे लीने सत्य ज्ञानतत्कार्यसंस्काराणामपि विनाशात्परमे केव
ल्ये परमानंदैकरसमखिलभेदप्रतिभासरहितमखंडं ब्रह्मावतिष्ठते॥

इत्युपचारव्यवहारभागवेजंति॥ बद्धः सत्वस्याप्यवास्तवत्वात्॥ तदुक्तमाचार्यैः॥ न निरो
धो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वा मुक्त इत्येषा परमार्थता॥ अस्य जीवन्मुक्तस्य राम॰
उपाधिविगमसमये प्राणोत्क्रमलिंगशरीरं अतितप्तलोहतलक्षिप्तनीरबिंदुवत्प्रत्यगभिन्नपर ५०
मानंदे लीनत्वात्स्थूलशरीरं तांतिष्ठतीति॥ ॥

अत्रश्रुतिमाह॥ न तस्येति॥ अयं जीवन्मुक्तं जीवन्नेव जरूप मानात् रागद्वेषादिबंधनादिदोषेष्वमु
क्तः सन् वर्त्तमानदेहपाते सति भाविदेहबंधान्विमुच्यत इत्यत्रापिश्रुतिमाह॥ विमुक्त इति॥ इहदा
रण्यकेपि यदा सर्वे प्रमुच्यंते कामा यस्य हृदि स्थिताः॥ अथ मर्त्योमृतो भवत्यत्र ब्रह्मसमश्नुते इति
वसिष्ठोपि॥ जीवन्मुक्तपदं त्यक्त्वा स्वदेहकालसात्कृते॥ विशत्यदेहमुक्तत्वं पवनोस्पंदतामिवेति
असंगोह्ययं पुरुषः आकाशवत्सर्वगतश्च नित्यः॥ अस्याविरंभ्रुवंमपविष्टमित्यादिश्रुत्याप्रतया

न तस्य प्राणा उत्क्रामंति अत्रैव समवलीयंते विमुक्तश्च विमुच्यत इत्यादिश्रुतेः॥

ट त्मनो नित्यत्वपरिपूर्णत्वकूटस्थत्वश्रवणात्॥ उत्पत्त्याप्तिसंस्कारश्चतुर्विधक्रियाफलविल
क्षणत्वेन विद्ययाविद्यानिवृत्तिमात्रेण प्राप्तस्यैवात्मा पुनः प्राप्त इत्युपचर्यते॥ अधिष्ठानस्यागम
नाभावे अध्यस्तस्यागमनायोगात्लमालोकादिमुक्तिसंभवः॥ नन्वप्राप्तस्य क्रियासाध्यस्य
वस्तुनो विद्यमानानुपत्तत्वनिवृत्तेश्च पुरुषार्थत्वं दृष्टं अत्र तदभावात् कथं पुरुषार्थत्वमिति
चेन्नयोरेव पुरुषार्थत्वं मितिनियमाभावात्॥ स्वच्छपायामारोपितराक्षसो विस्मितकं बगत
चामीकरस्पृष्ट्वा॥

प्तांतपुरुषस्य च प्राप्तवाक्येन तयोर्निवृत्त्यात्तयोरपि पुरुषार्थत्वेऽङ्गीकृतेऽनवस्था च संग्रहः॥ आत्मानात्मनोर्निरस्त
समलंपाशं चनत्वं परकं तस्याज्ञरणादिविक्रमवत्तात् छायापि त्यागाय यथा॥ यथोक्तम्॥ निर्दिष्टनिवृत्तमुनिशिरोमाका
दूरोरु छिनात्तध्वस्तध्वांतनिशास्तमः परस्फुरत्प्रशांतयोरुच्यते इति॥ न च मुक्तानामपि वसिष्ठादीनां प्रवृत्ती
नां अपरोक्षज्ञानिनां पुनर्देहांतरस्मरणात् केवलज्ञानोत्पत्तिसमये एवाल्पज्ञानानामस्माकं मुक्ति
र्भवति॥ इति कथं विश्वसिमः॥ अतो ज्ञानव्यतिरिक्तमप्युपायांतरं किंचित् कर्तव्यमिति वाच्यं
शास्त्रप्रामाण्यादेव तादृत्वेन ब्रह्मविद्ब्रह्मैव भवति॥ तरति रपि परित्यक्तत्वदेहज्ञानसमका
ल मुक्तः कैवल्यं याति हतशोक इति॥ वसिष्ठादीनां त्वाधिकारिकपुरुषत्वं न यावदधिकारं प्रार
ब्धवेगप्रयुक्तं ज्ञापादीनास्वीकृतावांतरदेहपातवितद्देहमाविशोगस्यनिवारयितुमशक्यत्वा
त्॥ प्रारब्धकर्मणोऽनेकदेकदेहारंभकत्वसंभवेऽपि परमदेहं विनाऽपरोक्षज्ञानोत्पत्तेरसंभावा
त्॥ वामदेवे तथाऽदृष्टत्वात्॥ अन्यथा गर्भस्मरणाद्यभावे ज्ञानोत्पत्त्यनुपपत्तेः॥ ननु ज्ञानीनामपि
स्वप्नावस्थापादेहांतस्वीकारवन्मुक्तानामपि पुनर्देहांतरस्वीकारः किं न स्यादिति चेन्न॥ कंवेस्व
प्नेसमाविष्टपदिस्यादिवाक्ये मुक्तंगानां लिंगमिनाभावश्रवणात्॥ देहपातपर्यंतमेव संसारदर्शनं॥
परमार्थेन॥ कथं तद्दर्शने देहं विना ज्ञानदुर्दमुच्यते॥ ॥

तस्माद्ब्रह्मात्मविज्ञानं दृढं परमविग्रहे॥ जायते मुक्तिदं ज्ञानं प्रसादादेव मुच्यते इति॥ तस्मात्सुष्ठूक्तं वि
मुक्तश्च विमुच्यत इति॥ नित्यशुद्धस्वरूपं परिपूर्णमद्वयं सच्चिदात्मकमखंडमक्षरं॥ सर्वदासुखमबोधतक्रे
तेव जितसदहमास्मतत्परं॥ १॥ गोवर्धनप्रेरणयाविमुक्तक्षेत्रे पवित्रे नरसिंहयोगी॥ वेदांतसार
स्य चकार टीकां सुबोधिनीं विश्वपतेः पुरस्तात्॥ २॥ जाते पंचशताधिके दशशते संवत्सराणां पु

वेदार्थः प्रतिपादितो गुरुमुखाद्व्याख्यायायात्म्यतां वाक्यार्थप्रविवेचमानपरमो सव्यः सतां स
वदा॥ शाम्भरूपत एव घोल्मफलदो वेदांतसाराभिधो ग्रंथो यत्र विराजते हृदि सदानंदः सखु
जन्यते॥ १॥

नः संजाते दशवत्सरेभ्युवर श्रीशालिवाहंशाके॥ प्राप्ते दुर्मुखवत्सरे प्रतिष्ठ
चौमासेन वस्यांतिथौ ग्रामे नागवदवासरे नरहरी टीकां चकारोज्ज्वलां॥ ३॥ ॥ इति श्रीपर
महंसपरिव्राजकाचार्यश्रीमत्कृष्णानंदभगवत्पूर्वज्यपादशिष्य नृसिंहसारस्वतीकृ
ता वेदांतसारटीका संपूर्णं॥ ॥समाप्तं॥ ॥श्रीरस्तु॥ ॥शुभंभवतु॥ ॥श्री॥

वे० टी०
५२

राम०
५२